since the process of creation cannot take place with the Absolute or unconditioned state he joins with upadhi, becomes conditioned and thus manages the process of creation. It is to be noted here that Atma, in the conditioned state, is naturally possessed of all the characteristics such as Adhishtanatwa or being the support of creation, the six powers essential for the agent of creation of the universe and of the state of Atma and so on just in the same way as in the case of the Absolute and unconditioned Atma. All these points are dealt with very lucidly and elaborately in the course of the commentary on the second aphorism of this shastra. Suffice it here to say that such passages of Adharvana Sruti as that (1) Soorya is Atma of the entire universe, (2) all the Bhutas evolve out of Soorya etc., emphatically prove that the term Atma applies to Soorya and that therefore he is the agent of creation.

Now, since the eternal sruti itself has recognised that Soorya is the agent of creation of the Swethavarahakalpa, the objection you raised above falls to ground. Further the statement made in the first aphorism of the shastra is proved, on the authority of the veda, to be correct, altruistic and in advancement of scientific lore.

This is the explanatory meaning of the first aphorism.

---

अध्यायः १, सूत्रम्, १अ.

# अत्मसिद्धिरधिष्ठानात्

# तत्पञ्चदशन्यायेन.

॥ बोधानन्दवृत्तः ॥

पदानित्रीणिसूत्रेस्मिन्नात्मसंसिद्धिनिर्णये । तत्रादिमपदेनात्मनिर्णयस्संप्रकीर्तितः ॥
अधिष्ठानस्वभावत्वंद्वितीयपदतस्स्मृतम् । स्वतस्सिद्धप्रमाणत्वंतृतीयपपतस्तथा ॥
एवंपदत्रयैस्सम्यक्सूत्रस्मिन्सप्रमाणतः । उक्तंस्यादात्मसंसिद्धस्सुविचार्ययथाविधि ॥
तत्रादावात्मविषय विचारस्सप्रकीर्त्यते । एकमेवेत्यदिवाक्यैरात्मावेत्यादिभिस्तथा ॥
सूर्य आत्मेतिनाकाशाआत्मेत्याद्यैरनेकधा । अत्माप्रभेदं श्रुतयेबहुधासंगिरन्तिहि ॥

## Chapter I—On Creation.

Aphorism IA.—According to the fifteenth axiom, that which is Adhishtana is Atma.

Or

From Adhishtana (Siddhi) Atmasiddhi results and it is proved by the 15th axiom.

This aphorism consists of three parts determining the nature of Atma. The first of them says what Atma is, the second determines the nature of Adhishtana and the third mentions the fifteenth axiom to prove how Adhishtana comes to possess that nature.

Thus the aphorism in its three parts determines authoritatively and briefly what Atma is. We shall now comment on these three expressions in detail.

Sruti in its different passages describes Atma differently as follows:—

(1) Brahma (Atma) is one, there being nothing else ;
(2) At first Atma alone and nothing else existed ;
(3) Surya or the sun is Atma ;
(4) Akasa is Atma, (and so on), thereby giving scope for viewing Atma in two aspects, (1) as one and (2) as many.

आत्मसंसिद्धिरेतेषु श्रुतिर्लोकहितैषिणी । एकस्यैवात्मनोब्रूतेउतानेकात्मनामिति ॥
संशयेसमनुप्राप्तेसिद्धान्तस्संप्रचक्षते । सत्यज्ञानानन्तरूपः परमात्मानिरञ्जनः ॥
सृष्ट्यादावेकएवासीन्नान्यत्किंचिन्मनागपि । सएवात्मा स्वमायोपाधिमंगीकृत्यहिस्वयम् ॥
गुणमूर्त्यादिभेदेनानेकात्मत्वमवापहि । उपाधिग्रहणात्पूर्वमखंडैकरसात्मनः ॥

There is therefore reason for doubt as to whether the term Atma referred to in the above aphorism applies to the oneness or to the manyness of Atma. This doubt is cleared up and the conclusion arrived at as follows.—

Prior to creation Atma alone, who was unaffected by Maya who was truth and knowledge and eternal, was and nothing else was.

Shastras declare that the same absolute and unmanifest Atma subjecting himself to the Maya Upadhi which exists within him naturally and inseparably, as moonlight in the moon, got different forms such as Brahma, Vishnu, Rudra, Surya and so on, and manifested as many Atmas. In other words, the same absolute and undivided Atma, prior to his subjecting himself to the Maya Upadhi, was absolute, unmanifest and undivided one, but afterwards by the illusion caused by the Maya Upadhi, expanded himself in to the form of Trimurtis and the entire universe, and manifested as many Atmas. In fact this condition of manyness to Atma is only apparent on account of illusion caused by Upadhi and as such is not real. This statement is corroborated by the following passages of Sruti:—

(1) Having created it (the Universe),

(2) He entered into it (the Universe),

(3) He caused himself to manifest in the form of the Universe, etc.

The first two of these passages declare that Paramatma is both cause and effect of creation, that as cause he, (affected by the Maya Upadhi) creates the universe, which is (in the form of)

आत्मसिद्धिस्स्वतस्सिद्धेत्याहसाक्षात्सनातनी । उपाधिग्रहणादूर्ध्वं सएवात्मानिरंशकः ॥
विवृतत्वं समासाद्यस्वस्मिन्नेवस्वयंक्रमात् । अनेकात्मत्ववद्भातिभ्रान्तिमात्रात्स्वतोनहि ॥
तत्सृष्ट्वातदेवानुप्राविशादित्यादिवाक्यकैः । तदात्मानंस्वयमकुरुतेतिवाक्यतश्चहि ॥
विवृताविवृताभ्यामेकस्यैवहिचिदात्मनः । एकानेकात्मसंसिद्धिं श्रुतिराहसनातनी ॥
आत्मसिद्धिर्द्विधाप्रोक्तामुख्यगौणविभागतः । श्रुत्याममेकात्मपरावाक्यास्स्युर्गौणसंज्ञकाः ॥
एकात्मबोधकायेस्स्युर्वाक्यास्तेमुख्यसंज्ञकाः । तात्कालिकात्मसंसिद्धिर्गौणवाक्यैरुदाहृता ॥

effect and that in the Antahkarana, which is in the form of the totality of essence of all beings, he reflects himself having no attachment with it, just as the sun in a mirror. The third passage avers that the same absolute Brahma (Atma) at the beginning of creation, by virtue of his Maya Upadhi rendered himself first as Avyakta* or unmanifest Brahma (Atma) and subsequently as Vyakta or manifest Brahma (Atma).

The (unmanifest) Avyakta itself expands and manifests in the form of the universe concrete and perceptible to senses. This state of Avyakta is known as Vyakta.

In this way passages of Sruti recognise the same absolute Atma, oneness on account of the unmanifest state and manyness on account of the manifest state (of Atma).

The term Atma is thus used in two senses, primary (Mukhya) and secondary (Gauna). The passages of Sruti delineating the nature of Atma are also of two kinds, major and minor ones. The major passages describe oneness in the primary sense of Atma, which is natural to him. The minor passages, on the other hand, denote manyness in the secondary sense of Atma, acquired on account of Upadhi.

Gauna Siddhi or the secondary aspect of Atma is so called, because the minor passages of Sruti speak of manyness of Atma,

---

***Avyakta is that state of universe which is abstract and imp rceptible to senses, but limited only by name and form.**

स्वतसिद्धात्मसंसिद्धिर्मुख्यवाक्यैरुदाहृता । असिद्धिर्गौणसंसिद्धिरितिवेदानुशासनम् ॥
एकात्मसंसिद्धिमेवलक्षीकृत्यश्रुतिस्स्वयम् । अनेकात्मत्वसंसिद्धिंप्राहशास्त्रेष्वनेकधा ॥
उपाधिनिरुपाधिभ्यामेकस्मिन्परमात्मनि । एकानेकात्मसंसिद्धिर्घटत्येवंनसंशयः ॥
ब्रह्माविष्णुमहेशानसूर्यस्कन्दादयःक्रमात् । भवन्तिस्वस्वरूपेणपरमात्मैवकेवलम् ॥
देहोपाधिवशादेवानेकात्मत्वंपरात्मनः । अनेकत्वमनित्यंस्यादात्मत्वंनित्यमेवहि ॥

which is not absolute and eternal, but transitory and limited by time and space. Contrarily the Mukhya Siddhi or the primary aspect of Atma is so called, because the major passages speak of oneness of Atma which is absolute, eternal and unlimited by time and space.

Sruti no doubt recognises these two aspects of Atma, but at the same time proclaims that the secondary state i. e., manyness of Atma, is not real and that it is not to be regarded as an independent state at all.

If so, it may now be questioned why such a secondary state of Atma is at all mentioned in the Sruti. The answer is this:—

Well, Sruti in speaking of manyness or manifest or secondary state of Atma keeps the oneness or unmanifest or primary state of Atma in view, considering the secondary state as acquired on account of Upadhi. In this way the same absolute, undivided and eternal Atma comes to be known in two aspects-manyness or transience on account of being affected by Upadhi, and oneness or eternity on account of being unaffected by it.

It may again be objected that when these two aspects are asserted of the same absolute and eternal Atma, they should both be essentially eternal, and it is wrong to say that the one is eternal and the other is not.

Well, this objection is solved thus: The same absolute Atma exists in both these unmanifest and manifest aspects. How unmanifest becomes manifest is this.

नित्यस्यैवात्मसंसिद्धिरनित्यस्यकदाचन । ब्रह्माविष्णुमहेशानसूर्यादिषुयथाक्रमम् ॥
यदस्तिनामरूपेद्वेतदुपाधिरितीरितम् । नामरूपविहीनात्मायोस्तितेषुनिरंशकः ॥
सर्वावभासकस्साक्षीसएवैकात्मनास्थितः । एतावदुक्तसंदर्भादात्मसिद्धिंस्वभावतः ॥
नामरूपाद्युपाधित्वमंगीकृत्यश्रुतिस्स्वयम् । अनेकात्मत्वमुक्त्वाथसिद्धान्तत्वेनकेवलम् ॥

Prior to creation absolute Atma having no forms such as Brahma, Vishnu, Rudra, Surya, Akasa and so on, was formless and alone, and so the unmanifest state evidently follows for Atma. The unmanifest Atma subjecting himself to the Maya upadhi, gets various manifestations and so the manifest state also evidently follows for Atma.

The unmanifest Atma on account of the Upadhi gets manifest forms infinitely --Brahma, Vishnu and so on, but as they are only illusory they are said to be inanimate. And as inanimate bodies have no self-effulgence, it is to be noted that the unmanifest Atma itself pervades in all manifest and inanimate bodies and animates them all. Thus, it is on account of the upadhi, giving rise to indefinite manifest forms such as Brahma, Vishnu and so on, that Atma, naturally absolute and unmanifest, gets the secondary aspect of manyness or comes to be possessed of the quality of existence as many.

The Sruti therefore declares that the manifest state of the unmanifest Atma on account of its being impermanent is styled as manyness of the Atma and the natural unmanifest state, by virtue of its being permanent is styled as the oneness of the Atma. In other words, that form of Atma which is natural and unmanifest and imperishable and eternal is alone Atma, but the illusory and manifest and perishable and transient forms such as Brahma, Vishnu and so on are not Atma. However, that which exists in all these inanimate manifestations in the form of an undivided whole, having no name and form, but present only as a mere on-looker and animates them all, is Atma indeed. In this way the unmanifest and undivided Atma comes to be viewed as many Atmas, on account of the manifestations it is subjected to.

एकात्मसिद्धिमेवाहमुख्यवाक्यैर्यथाक्रमम् । सूर्यआत्मेतिवाक्येनाथर्वकेपरमार्थतः ॥
स्वतस्सिद्धात्मानमेत्र सूर्योपनिषदिक्रमात् । सूर्योपाधिंपुरस्कृत्यगौणवाक्यात्स्वभावतः ॥
वत्साक्षिण्यात्मसंसिद्धिरुक्तस्यादितिनिर्णयः ॥

---

एवमेकात्मसंसिद्धिमुक्त्वाशास्त्रप्रमाणतः । तदात्मलक्षणमपि संग्रहेणाद्यकीर्त्यते ॥

॥ तदुक्तमात्मव्याख्याने ॥

जगत्सृष्टिस्थितिलयकारणत्वंतथैवहि । व्यापकत्वमसंगत्वमद्वितीयत्वमेवच ॥
निरधिष्ठानरूपत्वंनिर्गुणत्वमतःपरम् । सर्वाधिष्ठानरूपत्वंनिरंशत्वंस्वभावतः ॥
सच्चिदानन्दरूपत्वंनित्यत्वंचयथाक्रमम् । एतेदशस्वभावेनयस्यास्तिमततंस्वतः ॥
स आत्मेतिविशेषेणज्ञानिभिःपरिकीर्तितः ॥

All that is said so far comes to this. The minor passages of Sruti, recognising the Upadhi of name and form for the sake of argument, speak of manyness of Atma, but establish only the unmanifest aspect or oneness (of Atma) in the Major passages.

Similarly though the minor passage ' Surya is Atma ' of the Suryopanishad of Atharvana Veda apparently admits the secondary aspect of Atma to Surya (the sun), on account of the Upadhi, it is the primary aspect of oneness or absolute Atma that is meant by the Sruti.

Having thus established the applicability of the term Atma to Surya also, the definition of, or the characteristics essential to Atma will be stated.

According to Atma Vyakhyana, an authoritative work, the characteristics of Atma are that it should be :—

(1) both the material and instrumental cause of creation, preservation and destruction of the Universe,

(2) all-pervading like Akasa,

(3) non-attached like sunlight,

(4) one like bliss and happiness of sound sleep (Sushupti),

अन्यच्च ॥

निमित्तत्वमुपादानकारणत्वंतथैवच ॥ साक्षित्वंचैवक्रमशोजगत्सृष्ट्यैबकेवलम् ।
स्वेमहिम्निस्वयंस्थित्वाखस्मिन्नेवस्वयंक्रमात् । स्वेक्षणेनस्वशक्त्याचस्वप्रवेशेनतत्त्वतः ।
उपाधिनिरुपाधिभ्यांयदात्मेतिस्वभावतः । तदात्मेतिविशेषेणप्रवदन्त्यात्मवेदिनः॥

अपिच ॥

यदाप्नोतियदादत्तेयच्चात्तिविषयानिह । यच्चास्यसन्ततोभावः तस्मादात्मेतिकीर्त्यते ॥
इत्यादि ॥

(5) undivided like Gagana (the sky),

(6) without support (Adhishtana) (to it) like bliss of Ananda,

(7) without attributes like Tureeya,

(8) support (Adhishtana) to everything like Kutastha,

(9) Sat, Chit and Ananda like self realisation,

(10) eternal like Akshara.

Thus the learned declare that what possesses all these ten qualities in itself naturally and eternally is known as Atma.

Another authority, Viswambhara Acharya observes that the potentiality which, for the sake of propagating creation, has within its own glory the three qualities viz., of being the instrumental cause by the Ikshana upadhi, of material cause by the Maya upadhi, and of being only a mere on-looker in the universe, which is evolved by the above two causes and into which it enters and pervades throughout it, without being attached to it, is said to be Atma.

In determining the essential characteristics of Atma it is further stated that He who enters the universe and pervades throughout it, having no attachment with it, who is support (adhishtana) for the entire universe and holds it within Him, who, though non-attached with the universe still enjoys the

सूत्रादिमपदादेवमात्मसिद्धिप्रमाणतः । उक्त्वाधिष्ठानसंसिद्धिरिदानींसंप्रचक्षते ।
सूत्रेपञ्चदश न्यायादधिष्ठानत्वमात्मनः । तृतीयपदतस्तद्वद्द्वितीमपदतस्स्मृतम् ।
तयोरादौ पञ्चदश प्रमाणोक्तिंनिरूप्यच । पश्चादधिष्ठानसिद्धिरात्मनस्सन्निरूप्यते ॥

objects thereof on account of the Ahankara (Ego) Upadhi and of whom the universe is an inseparable nature is known as Atma.

Having thus established authoritatively the state of Atma (Atma Siddhi) suggested by the first part of the aphorism referred to above, we shall now describe how Atma comes to possess the condition of Adhishtana, as without this, the nature of Atma will only be imperfect ; nay, Atma cannot be as such without it.

The possession of the nature of Adhishtana is suggested in the second and the third parts of the aphorism. We shall explain the 15th axiom first, suggested by the third part and then the nature of Adhishtana, dealt with in the ***second*** part.

---

॥ १५ स्वतस्सिद्धन्यायसूत्रम् ॥

# शक्तित्रय विशिष्टत्वेसत्येकस्मिन्नात्मन्यधिष्ठानान्तराभावात्सर्वाधिष्ठानभूत ब्रह्मात्मनास्याद्विवृताधिकारश्चस्वस्मिन् ॥

बो. वृ. ॥

शक्तित्रयविशिष्टत्वादेकस्मिन्परमात्मनि । अधिष्ठानान्तराभावात्स्वस्मिन्नेवस्वभावतः ॥
सर्वस्याधिष्ठानरूपाद्ब्रह्माकारेणकेवलम् । विवृतत्वाधिकारत्वंसहजंस्यादितीरितम् ॥

॥ शक्तित्रयमुक्तमात्मशक्ति विलासे ॥

अत्यद्भुतास्स्वतस्सिद्धानानाचित्रविचित्रकाः । शक्तयस्सन्त्यसंख्याकाश्चिन्मयेपरमात्मनि ॥
आत्मनस्सहजानित्यामहावेगप्रकाशकाः । प्रधानशक्तयस्तासुमुख्यास्तिस्त्रइतीरिताः ॥
एतासु विवृतशक्तिः प्रथमेतिप्रकीर्तिता । द्वितीयाव्यापकाशक्तिश्चिच्छक्तिस्स्यात्तृतीयका ॥
इत्युक्तंचित्सुखाचार्यैः एताएवविशेषतः । प्रोक्तास्शक्तित्रयमितिन्यायसूत्रेयथाक्रमम् ॥

THE FIFTEENTH AXIOM.

It is natural to Atma, in whom the three-fold Shakti is inseparably blended and who has no support but is support to everything else, to expand himself within himself, into the form of the universe, by virtue of his own power. This is the axiom.

## BODHANANDA'S COMMENTARY.

The absolute Paramatma is all powerful. There is no adhishtana for him but he is adhishtana of all. Therefore, naturally, he can extend himself in himself into the form of the universe, by means of the threefold potentiality (Shakti Traya) ever present in him.

The three powers included in this threefold potentiality (Shakti Traya) are named and their work explained by Chitsukhacharya, in a work known as Atma Shaktivilasa, thus:—

यथाजलतरंगाद्या अस्पृष्ट्वासूर्यमण्डलम् । तस्यनानाविकारेण कुर्वन्तिविवृतत्वताम् ॥
तथैवविवृतशक्तिस्त्वमस्पृष्ट्वामहेश्वरम् । विवृतत्वंकल्पयति तस्यैवपरमात्मनः ॥
तथैवव्यापकाशक्तिर्निश्चैतन्येजडात्मके । विवृताकाररूपेस्मिन्जगतिस्वीयतेजसा ॥
प्रविश्यासङ्गभावेनतद्व्याप्याकाशवत्क्रमात् । दत्वास्वसन्निधानेनचैतन्यंजगतस्स्वयम् ॥
अहंकारंपुरस्कृत्यव्यवहारादिषुक्रमात् । स्वतःप्रवृत्तिंसर्वत्रप्रकल्पयतिनान्यथा ॥
चिच्छक्तिर्विवृताकारंजगदेतच्चराचरम् । पश्चात्तदन्तर्बहिश्चस्वभासाभासयेत्पुनः ॥
स्वप्रकाशादेवस्वस्मिन्साक्षिरूपेणसंस्थिता । सद्भावत्वमभावत्वंवस्तुनः पश्यनिस्वयम् ॥
यतस्स्वविवृतशक्त्याजगद्रूपंजडात्मकम् । यतोव्यापकशक्त्याथजगच्चैतन्यरूपकम् ॥
सर्वावभासकत्वंचस्वचिच्छक्त्यायथाक्रमम् । यतोभवेत्ततोधिष्ठानान्तरत्वंपरात्मनः ॥
द्वितीयवस्त्वभावत्वान्नास्त्यैवेतिनिरूपणात् । स्वतोधिष्ठानसंसिद्धिर्घटत्येवनसंशयः ॥
एवंनिरूप्याधिष्ठान सिद्धिकारणमात्मनः । अथेदानीमधिष्ठानलक्षणंसंप्रचक्षते ॥

The self-effulgent and absolute Atma has myriads of wonderful powers, which are natural, inasmuch as they are irrespective of cause and effect and have peculiar forms. Of these infinite powers the three viz., Vivruta, Vyapaka and Chit Saktis, which are inseparable from Atma, which are eternal and which are of extraordinary power and radiance, are the most important. In the Nyaya Sutra (aphorism) referred to above, it is these three powers that are mentioned as "Shakti Traya".

Having thus explained the three powers, now their work will be described.

Just as ripples, without touching the sun reflected on a sheet of water, cause the sun to appear in an expanded form, other than his natural state, so also the Vivruta Shakti, without touching Paramatma who is its adhistana, causes Atma to appear in an expanded form, other than his natural state. This is the function of Vivruta Shakti.

The Vyapaka Shakti, being non-attached, enters into the universe which is emanated by Vivruta Shakti and which is inert and inanimate, pervades throughout it just like Akasa and

तदुक्तमात्मतत्त्व प्रकाशिकायाम् ॥

अविकृतत्वजगत्सर्वं वर्ततेयत्स्वभावतः । तदधिष्ठानमित्याहुश्शास्त्रेषुबहुधाबुधाः ॥

अन्यच्च ॥

यद्बिभर्तिजगत्सर्वंजगद्यन्नबिभर्तिहि । तदधिष्ठानमित्याहुर्ज्ञानिनस्तत्त्वदर्शिनः ॥

इतिसृष्टिविलासे ॥

अन्यच्च ॥

यत्स्वमायोपाधिशक्त्याजगदेतच्चराचरम् । सृष्ट्वातदन्तरेपश्चादन्तर्यामितयास्वयम् ॥

स्थित्वासंधार्यतेसर्वमसंगत्वेनकेवलम् । तदेवाधिष्ठानमितिप्रवदन्तिमनीषिणः ॥

इतिप्रपञ्चलहर्याम् ॥

अपिच ॥

निमित्तत्वमुपादानत्वमात्मत्वंतथैवहि । निराधारस्वभावत्वंसर्वाधारत्वमेवच ॥

सर्वविभासकत्वंचयस्यास्तिसततंस्वतः । तमेवाधिष्ठानमितिप्रवदन्तिमनीषिणः ॥

by its mere presence, renders it animate and in all beings gives rise to Ahankara (egotism) and volition in all their actions. This is the work of Vyapaka Shakti.

Then again the Chit or Prakasa Shakti of Atma pervades the entire animate and inanimate Universe, illuminates it in and out by means of its own radiance, and exists therein as a mere on-looker, observing the presence or absence of things. This is the work of Chit Shakti.

Thus, that which expands into the form of the inanimate universe with its Vivruta Shakti, animates it with its Vyapaka Shakti, and illuminates it with its Chichakti, is undoubtedly its own Adhishtana, since there exists nothing beyond it and is Adhishtana of the universe as well.

Having thus established how Paramatma comes to possess the nature of Adhistana, now its definition will be given.

## DEFINITION OF ADHISHTANA.

Atma Tatwa Prakasika, an authoritative work declares that that which is the natural support of the universe, is known as Adhishtana.

एवंसूर्योपनिषद्वाक्यप्रमाणानुसारतः । सूर्योपाधिंपुरस्कृत्यसाक्षिणःपरमात्मनः ॥
श्रुतिवाक्यप्रमाणेनन्यायसूत्रबलेनच । उक्त्वाधिष्ठानसंसिद्धिमात्मसंसिद्धिमेवच ॥
अथेदानींसूर्यकिरणशक्तिसंयोजनक्रमात् । ब्रह्माण्डादिक्रमादेतज्जगत्सृष्टिविशेषतः ॥
आलोड्यपूर्वशास्त्राणियथामतिनिरूप्यते ॥

Another work, Srushti Vilasa, lays down that that which holds the universe and which the universe cannot hold, is Adhishtana.

Prapanchalahari, another (scientific) work, says that that which, by its Maya upadhi, gives rise to the universe and which being latent in and non-attached to it, holds it, is adhishtana.

Lastly, the learned proclaim that that which is both the material and instrumental cause of the universe, which has all characteristics necessary to Atma, which, having no support, is support to everything and which illuminates everything is Adhishtana.

Thus on the authority of the Suryopanishad and other passages of Sruti and of the Nyayasutra, the state of Atma (Atma Siddhi) and the state of Adhistana (Adhistana Siddhi) have been established for Surya (the sun), recognizing the Surya Upadhi for Atma. In other words, it is Atma that functions through Surya. We shall now proceed to describe the creation caused by the action of the Solar rays.

## ॥ सृष्ट्यधिकारः ॥

॥ सूत्रम् २ ॥

## ॥ तत्सृष्टिरसंगाच्चिच्चैत्याभ्यामूर्णनाभिवत् ॥

॥ बोधानन्दवृत्तिः ॥

रवेरधिष्ठानसिद्धिमात्मसिद्धिंचसंग्रहात् । एवमुक्त्वाजगत्सृष्टिक्रममद्यनिरूप्यते ॥

सृष्टिप्रबोधकपदान्यस्मिन्चत्वार्यथाक्रमम् । सन्तितेष्वादिमपदादात्मसृष्टिःप्रदर्शितः ॥

सृष्ट्यामसंगभावत्वमात्मनोक्तंद्वितीयतः । निमित्तोपादानशक्तिद्वयमुक्तंतृतीयतः ॥

**APHORISM 2.**

Since Atma is Asanga or non-attached to everything, his creation is conducted through (his) chit and Chaitya Saktis, just like the weaving of a web by the spider. This is the aphorism.

BODHANANDA'S COMMENTARY.

By the first aphorism Atma Siddhi and Adhishtana Siddhi have been established for Surya. Now the process of Creation of Atma through Surya, will be explained in this second aphorism.

This aphorism consists of two words expounding the process of Creation. The first of them denotes the process of creation of Atma, the second expresses non-attachment of Atma to the creation, the third signifies the two causes Nimitha and Upadana or the Instrumental and material causes for the propagation of creation and the fourth gives an illustration (parallel) to show that the creation by Atma is similar to the web woven by a spider.

Having thus explained the four words of the aphorism now we shall give its purport as follows:

THE PURPORT:—

To manufacture a certain article in this world, the agent or the doer and the materials of and with which the article is to be prepared are essential. Similarly, when we consider the

चतुर्थपदतस्स्पष्टंदृष्टान्तस्सन्निदर्शितः । एवंपदार्थःकथितस्संग्रहार्थोनिरूप्यते ॥
चिच्छक्तिश्चैत्यशक्तिश्चेत्यात्मशक्तिर्द्विधामता । ताभ्यामसंगभावेनपरमात्मानिरञ्जनः ॥
अनेककोटिब्रह्माण्डाकारेणैतज्जगत्स्वयम् । स्वसन्निधानमात्रेणैवोर्णनाभिरिवासृजत् ॥
सूत्रस्यैवंसमासेनसामान्यार्थोनिरूपितः । अथेदानींविशेषार्थस्सम्यगत्रनिरूप्यते॥ ॥

---

चिच्छक्तिस्सप्तमन्यायादात्मनोघटतिस्वतः । चैत्यशक्तिस्सप्तदशन्यायतस्संप्रकीर्तितः ॥
चित्वंचिच्छक्तिमत्वंचप्रदर्शयितुमात्मनः । स्वतस्सिद्धन्यायसूत्रद्वयमत्रनिरूप्यते ॥

authorship and the materials and instruments of and with which the universe is created, the Sruti " O Kasyapa, your production (i. e., the Universe) is very fine" expounds that the Self in the form of the sun, namely Kasyapa, is the agent and that the two energies of Atma i.e., Chit or an energy which exists eternally in Atma and Chaitya or an energy which appears at times and disappears at other times, are the materials and instruments. It further states that just as the spider, with the materials and instruments of its own body, weaves its web having no attachment with it, so also Paramatma creates the universe consisting of myriads of Brahmandas with the two above mentioned energies inherently present in him and in a manner having no attachment whatsoever to the thing created.

A detailed explanation of the same runs as follows:—

The fact that the two energies, Chichakti and Chaitya Shakti are natural faculties of Atma, is established thus.

For this purpose two axioms, (the 7th and the 17th) have been mentioned here, of which the former establishes that Atma not only is of the nature of Chit but also possesses Chichakti, while the latter (17th) establishes that he possesses Chaitya Shakti also. We shall first take up the 7th axiom and then the 17th one.

The word Chichakti dealt with in this aphorism, is explained thus.

॥ ७ स्वतस्सिद्धन्यायसूत्रम् ॥

# स्वयंप्रकाशत्वेसत्येनसर्ववस्तूनि स्वप्रकाशाच्चित्वं सर्वावभासकत्वाच्चिच्छक्तित्वं च सहजंस्यात्सूर्यवत् ॥

---

॥ बोधानन्दवृत्तिः ॥

रवेस्स्वयंप्रकाशत्वंयथातद्वत्स्वभानतः । सर्वावभासकत्वंचसहजंस्यात्स्वभावतः ॥
तथैवात्मनिचित्वंचचिच्छक्तित्वमपिक्रमात् । स्वतस्संभवतीत्यस्मिन्सूत्रेसम्यक्प्रदर्शितम् ॥
तदर्थंविशदीकृत्यसतांमोदायकेवलम् । समालोच्ययथाशास्त्रंसंग्रहेणप्रकीर्त्यते ॥
स्वयंप्रकाशाखंडैकरसब्रह्मैवकेवलम् । सूत्रेस्मिन्वस्त्वितिप्रोक्तंसंकेतत्वेनचक्रमात् ॥
द्वितीयवस्त्वभावत्वात्स्वान्यत्तस्यैववस्तुनः । स्वयंप्रकाशमानत्वमेकत्वंचयथाक्रमम् ॥
घटत्येवस्वभावेनश्रुतिमानानुसारतः । यतस्स्वयंप्रकाशत्वंततश्चित्वंपरात्मनः ॥
सर्वावभासकत्वंतच्छक्तेर्यस्मात्स्वभावतः । तस्माच्चिच्छक्तित्वमपिब्रह्मणस्सहजंभवेत् ॥

Chit + Shakti=Chichakti. Chit means self effulgence; and Shakti means the inherent power of this effulgence, which illuminates the entire universe.

This axiom aims at establishing the presence of these two Characteristics in Atma, thus.

## THE SEVENTH AXIOM.

If in a certain thing the two qualities viz., self-effulgence and capability of illuminating everything else with its effulgence are inherently present, it is evident that it possesses the two qualities viz., Chit by virtue of its being self-effulgent and Chichakti by virtue of its being capable of illuminating everything else. This is the bare meaning of the aphorism.

The axiom aims at establishing that Atma naturally possesses the two characteristics, Chit and Chichakti, by presenting the illustration of the sun, who has the two characteristics viz.,

यदुक्तंसूर्यवदितितद्दृष्टान्तमितिस्मृतम् । स्वयंप्रकाशमानत्वेसत्येकस्मिन्परात्मनि ॥
द्वितीयवस्त्वभावत्वादेकत्वंतद्वदेवहि । सर्वावभासकत्वाच्चिच्छक्तित्वमपिचक्रमात् ॥
प्रकाशान्तरराहित्यात्स्वयंभानत्वमात्मनः । स्वभावादेवसहजमितिन्यायनिरूपणम्॥
एवमुक्त्वासप्तमन्यायनिर्णयमतःपरम् । तथासप्तदशन्यायनिर्णःपरिकीर्त्यते ॥

---

॥ १७ स्वतस्सिद्धन्यायसूत्रम् ॥

# ॥ यत्र चिच्छक्तिस्तत्रचैतयशक्तिसंभवस्सहजं स्याद्बीजांकुरवत् ॥

॥ बोधानन्दवृत्तिः ॥

बीजेयथांकुरोत्पत्तिस्सहजंस्यात्तथैवहि । स्वतोस्तियत्रचिच्छक्तिस्तत्रकर्मविपाकंतः ॥

self-effulgence and capability of illuminating everything else, thus.

It is the self-luminous, undivided and absolute Atma itself that is indicated by the word 'Vastu' or thing in this axiom. As there exists nothing except this 'thing', it naturally follows that it is both self-luminous and one (without a second), as Sruti declares it to be. This one without a second thing or Atma, therefore, comes to possess naturally the two qualities viz., Chit and Chichakti as explained already.

The expression 'Suryavat' or like the sun in this aphorism only gives an illustration to the point under explanation.

Thus the 7th aphorism expounds the fact that Atma is naturally one without a second inasmuch as there is nothing except it, that it is self-effulgent as there is no luminous object except it, and that it naturally possesses Chichakti by virtue of its being capable of illuminating everything.

Having thus explained the 7th axiom we shall take up the 17th one.

चैत्यशक्तेस्संभवोपिसहजंस्यादितीरितम् । तस्माच्चिच्छक्तिवच्चैत्यशक्तिरप्यात्मनस्स्वतः ॥
सहजंस्यादितिसप्तदशन्यायविनिर्णयः । शक्तिद्वयंचात्मनोक्तमेवंन्यायद्वयेनहि ॥

## THE SEVENTEENTH AXIOM.

Just as it is natural that a sprout comes out of a seed, of course under suitable conditions, so also it is natural that Chaitya Sakti evolves out of Chichakti on account of the ripening of the fruit of actions (Karma Vasanas) of creatures, which were melted in it (Chichakti) during the past dissolution (pralaya).

Thus the 17th axiom establishes that Paramatma naturally possesses Chaitya shakti as well as Chichakti.

॥ ३. सूत्रम् ॥

# ॥ तस्यां ईषत्स्पन्दनमग्नीषोमाभ्यां तच्चैत्य शक्तिरिति ॥

॥ बोधानन्दवृत्तिः ॥

एवंन्यायद्वयाच्छक्तिद्वयमुक्तंपरात्मनः । इदानीं चैत्यशक्तिस्वरूपमत्रनिरूप्यते ॥
चैत्यशक्तिस्वरूपप्रबोधकानियथाक्रमम् । पदानिसप्तसूत्रेस्मिन्निर्णितानियथाविधि ॥
तेष्वादिमपदाच्चिच्छक्तिस्वरूपःप्रदर्शितः । द्वितीयपदतःप्रोक्तंस्पन्दनस्यविशेषणम् ॥
तृतीयपदतश्शक्तेरीषत्स्पन्दनमीरितम् । चतुर्थपदतोग्नीषोमशक्तिद्वयमीरितम् ॥
तथैवपञ्चमपदादुक्तंचैत्यविशेषणम् । तदुत्तरपदाच्चैत्यशक्तिरूपःप्रदर्शितः ॥

3RD APHORISM.

This aphorism explains the nature of Chaitya Shakti.

In this aphorism there are 7 words determining the nature of Chaitya Shakti. The first word describes the nature of Chichakti The second is an attribute to the next word, Spandana. The slight agitation (Ishat spandana) of Chichakti is denoted by the third word. The fourth word represents the two powers of Agnishoma Shakti. The fifth word qualifies the word, Chaitya. The sixth describes the nature of Chaitya Shakti. The seventh word completes the predication, the verb being understood.

Having thus divided the aphorism into simple words we shall now explain the general sense.

In every Kalpa the universe has three stages, creation, preservation and dissolution. Of these, the third stage, dissolution is so called because, in it, the whole created universe dissolves or disappears in Prakriti, just as things in the dark. At this stage the Karma Vasanas * or fruits of actions of all

* 'Karma Vasanas' are the instincts of all actions done by creatures in the Universe till dissolution, which remain pictured in their minds.

तथैवसप्तमपदात्तत्प्रकारोनिरूपितः॥ एवंपदार्थमुक्त्वाथसूत्रस्यविधिवत्क्रमात् ॥
क्रोडीकृत्ययथाशास्त्रमेतेषामर्थनिर्णयः । अथेदानींसंग्रहेणयथामतिनिरूप्यते ॥
प्रपञ्चप्रळयेसर्वप्राणिनांकर्मवासनाः । शुक्लकृष्णरजोरूपाःस्वभावेनपृथक्पृथक् ॥
प्रविश्याग्नीषोमशक्त्यांसाम्यावस्थांव्रजन्तिहि । तैस्सहाग्नीषोमशक्तिश्चिच्छक्त्यामथलीयते ॥
तदन्तर्गतचित्प्रतिबिंबश्चापिस्वयंक्रमात् । बिंबरूपेचितिततस्स्वस्वरूपेणलीयते ॥
पश्चादग्नीषोमशक्त्यन्तर्गतकर्मवासनाः । क्रमात्कालविशेषेणपरिपक्वंगतायदि ॥
अत्यन्तसूक्ष्मरूपेणविकासत्वंभजन्त्यथ । पश्चात्तद्वासनास्स्वस्वशक्तिभिःकर्मगर्भितैः ॥
चिल्लीनप्रतिबिंबांशुप्रकाशांशमतःपरम् । वालाग्रशतभागस्यदशैकांशप्रमाणतः ॥
क्रमात्सूरणमार्गेणाकर्षयन्तिस्वभावतः । पश्चात्तच्छक्तिसंयुक्तास्तेग्नीषोमीयमण्डलम् ॥

creatures in the universe, enter into Moola Prakriti or Agnishoma shakti. These fruits of actions being of the three qualities Satwa, Raja and Tama enter severally into the Agnishoma Shakti in their innate colours, white, red and black and exist there in three equal aggregate portions.

Thereupon these fruits of actions dissolve in Agnishoma Shakti or Moola prakriti, which in its turn dissolves in Chichakti. The reflected image of Chit (Chit Pratibimba) ‡ which mixed with Agnishoma Shakti gets dissolved in Atma who is in the form of Chit.

The fruits of actions of all creatures, which had dissolved in Agnishoma shakti, undergo the process of fructification throughout the period of dissolution (Pralaya), and when this period, as fixed by mathematical calculations, comes to a close, they become fully ripened (become acquainted with the way of doing actions in the next creation) and then begin to bloom or expand very slightly. They then get ready for creation and attract, with their forces enveloped by action, the light of the reflected image of Brahma (Atma), as much as one-tenth of a hundredth part of the tip of a hair, through Soorana marga or a passage pointing the direction for creation.

---

‡ **Chit Prathibimba is the image of Atma, seen in Prakriti just as the image of an object reflected in a looking glass.**

प्रविशन्त्यतिवेगेनस्वनीडमिवपक्षिणः । तत्रत्याग्नीषोमशक्तिद्वयंव्याप्यद्विधाक्रमात् ॥
स्वसन्निधानमात्रेणविभज्याथयथाक्रमम् । वामेसोमंदक्षिणेग्निंस्थापयामासतुःक्रमात् ॥
पश्चात्तयोर्भ्रमणत्वंविंशतिन्यायतोभवत् । तद्भ्रामणप्रमाणंतुसंख्ययात्रप्रदृश्यते ॥
शतकोट्यष्टलक्षत्रिसहस्रत्रिशतंक्रमात् । निमेषमात्राद्भ्रमणमग्निशक्तेस्स्वभावतः ॥
तथैवसोमशक्तेश्चप्रभवत्यतिवेगतः । एवमग्नीषोमीयमण्डलेस्मिन्भ्रमणंतयोः ॥
यदाभवतिवैचित्र्यात्तदाचिच्छक्तिरंजसा । स्वान्तर्गताग्नीषोमीयशक्तिभ्यांक्षुभिताभवेत् ॥
तेनयत्स्पन्दनंतस्यांभवत्यत्यन्तसूक्ष्मतः । यदीषत्स्पन्दनंतस्यांतदेवात्रविचारतः ॥
चैत्यशक्तिरितिप्रोक्तंसूत्रेस्मिन्संप्रदायतः । एवमुक्त्वासंग्रहार्थंसप्रमाणंयथाविधि ॥
अथेदानींविशेषार्थंस्सम्यगत्रनिरूप्यते । उक्तमग्नीषोमशक्त्योर्भ्रमणंन्यायसूत्रतः ॥
तद्विंशतिन्यायसूत्रंविविच्यात्रप्रचक्षते ।

---

॥ २० स्वतस्सिद्धन्यायसूत्रम् ॥

# शक्तेश्चलनत्रैविध्यंस्वोष्णतरंगघर्षणादग्निवत्

They, then mingling with the light of Atma, enter into Agnishoma Mandala very rapidly, just as birds enter into their nests. Afterwards they, by their mere presence, divide the mixture of Agnishoma powers of that globe into two viz., Soma and Agni and locate the former at the left side and the latter at the right side of that Agnishoma globe. Thereupon according to the 20th axiom these two powers begin to revolve separately, each making one crore, eight lakhs, three thousand and three hundred revolutions per second. By the rapidity of the revolution of these Agni and Soma powers in the Agnishoma mandala, Chichakti (on account of its contact with the former) also gets a slight agitation (Ishat Spandana). It is the slight agitation thus produced in Chichakti, that is referred to as Chaitya Shakti in the above aphorism.

20TH AXIOM.

It is natural to Chichakti, by virtue of the friction of its hot waves, to give rise to three kinds of powers just like fire.

॥ बोधानन्दवृत्तिः ॥

रूपद्वयंभवेच्छक्तेर्लोहितंप्रथमंतयोः । द्वितीयरूपंचपलमितिप्राहुर्मनीषिणः ॥
यल्लोहितस्वरूपंस्यात्तत्पुंशक्तिरितिस्मृता । तपनत्वात्तापनेतिप्रवदन्तिमनीषिणः ॥
अचलातापसंयुक्तानित्यासूक्ष्मस्वरूपिणी । स्वभावात्तपनाशक्तिस्सर्वत्रव्याप्यतिष्ठति ॥
शक्तेश्चलनरूपंयत्तत्स्त्रीशक्तिरितीर्यते । तपनोद्गारितोष्णस्वरूपासेतिप्रकीर्तिता ॥
तपनाशक्तिसान्निध्यादेतच्छक्त्यांस्वभावतः । उष्णाधिक्यंभवेत्तस्मात्तरंगास्सूक्ष्मरूपिणः ॥
एकादशोत्तरत्रिशतसंख्याकास्सर्वतोमुखाः । क्षोटिकावच्छिन्नकालेप्रभवन्तियथाक्रमम् ॥
त्रिविधंचलनंपश्चात्तत्संघर्षगतःक्रमात् । भवत्येवाग्निवत्तस्यामितिन्यायविनिर्णयः ॥

॥ तरङ्गलक्षणमुक्तंशक्तितन्त्रे ॥

प्रथमोद्गारिताशक्तिर्लोहितेनस्वभावतः । उच्यतेतपनइतिशास्त्रेषुज्ञानवित्तमैः ॥
तपनत्रयमुष्णंस्यात्तदुष्णत्रयमुत्सगम् । पञ्चोत्सगात्स्पन्दनंस्याच्चलनंस्पन्दनत्रयम् ॥
तत्पञ्चकंतरंगस्स्यात्तत्पुंलिंगमुच्यतेत्यादि ॥

## COMMENTARY.

Chichakti is of two kinds viz., Lohita (Red) and Chapala: the former is said to be masculine and the latter feminine. The masculine power is also known as Tapana, by virtue of its having the property of burning. Further it is motionless, very hot, indestructible, very subtle (Sukshma) and capable of pervading everywhere. The feminine power, on the other hand, is in the form of heat emitted out of Tapana or masculine power. By the mere presence of this masculine power, excessive heat is produced in the feminine power (which is already in the form of heat) thereby giving rise to 311 fine waves per second, in all directions. By the friction of these waves (with each other), three kinds of motion are naturally produced in Chichakti, just as in fire. This is the explanation of the 20th axiom.

Shakti Tantra, an authoritative scientific work gives the following, regarding the magnitude of these waves.

॥ चलनत्रैविध्यमुक्तंशक्तितन्त्रे ॥

बाह्यप्रयत्नस्त्रिविधश्शक्तिर्वेगोन्मुखेक्रमात् । प्रयत्नोन्मुखचलनश्चेतिशक्तित्रयंबुधैः ॥
एतत्तरंगसंघर्षणादुष्णस्येतिकीर्तितम् । वेगप्रयत्नमीषत्स्पन्दनमित्युच्यतेबुधैः ॥
पूर्णस्पन्दनमेवात्रवेगोन्मुखमितीरितम् । वेगारंभश्चलनमित्युक्तंशास्त्रविदांवरः ॥

That much of power which is initially and naturally emitted by Lohita or the masculine energy is known as Tapana.

| | | | |
|---|---|---|---|
| 3 Tapanas | make | 1 Ushna |
| 3 Ushnas | „ | 1 Ulbana |
| 5 Ulbanas | „ | 1 Spandana |
| 3 Spandanas | „ | 1 Chalana |
| 5 Chalanas | „ | 1 Taranga |
| 3 Tarangas | „ | 1 Linka |

In this way the table continues.

The three kinds of powers produced in Chichakti are described in Shakti Tantra as follows.

The initial force (external attempt) necessary for any energy to generate a current (Pravaha), is of three kinds viz., Prayatna (attempt), Unmukha (preparation) and chalana (motion) which are known as Shakti Traya. They are produced by the friction of the waves of heat. The attempt (Prayatna) of the energy to set in speed (Vega) is said to be slight agitation (Ishat Spandana). This is the first stage of the force. Complete agitation is said to be preparation (Unmukha) of the energy and is the second stage of the force. When the current starts it is said to be (motion) Chalana and the third stage of the force.

The time-limit of each of these stages of the energy is stated as follows:—

Ishat Spandana (slight agitation) requires one second.

Vegonmukha or Preparation requires thrice the above or three seconds.

Chalana or motion requires twice the above or six seconds.

॥ कालप्रमाणमुक्तंतत्रैव ॥

निमेषकालस्स्यादीषत्स्पन्दनस्यतथैवहि । वेगोन्मुखस्यतत्कालत्रयमित्युच्यतेबुधैः ॥
भवेत्तद्द्विगुणःकालःचलनस्ययथाक्रमम् । चलनत्रयकालोत्रवेगइत्यभिधीयते ॥
तद्वेगकालदशकमतिवेगइतिस्मृतः । अत्यन्तवेगोतिवेगदशकंभवतिक्रमात ॥
तच्छतंस्यान्महावेगइतिवेगविनिर्णयः । वेगात्पूर्वप्रयत्नंयच्चलनत्रयमुच्यते ॥
एवंरूपद्वयंशक्तेरुक्तंन्यायप्रमाणतः । चलनत्रयस्वरूपमपिशास्त्राद्यथाक्रमम् ॥
इतितृतीयसूत्रार्थस्संग्रहेणयथाक्रमम् । कीर्तितंभवतिन्यायप्रमाणादपिशास्त्रतः ॥

These three are external attempts for an energy to start in the form of a current.

THE TIME TABLE.*

| | | | |
|---|---|---|---|
| 3 | Chalanas | make | 1 Vega. |
| 10 | Vegas | ,, | 1 Athi Vega |
| 10 | Athi Vegas | ,, | 1 Atyanta Vega |
| 100 | Atyanta Vegas | ,, | 1 Maha Vega |

The Vega prayatna or the slight agitation of an energy described above is Chalana.

Thus the two kinds of Chichakti and the nature of the three kinds of chalana (agitation or motion) have been explained by the help of the above axiom and Shakti-tantra respectively.

The 3rd aphorism has thus been explained briefly on the authority of axioms, shastras and mathematical calculation.

---

* Different energies have different time-limits for these three stages. That which is mentioned here is applicable only in connection with the energy in Chichakti under explanation.

॥ ४ सूत्रम् ॥

# ॥ तद्वेगोत्क्षेपणात्तत्संभवस्तस्या द्वीपवत् ॥

॥ बोधानन्दवृत्तिः ॥

पूर्वसूत्रेचैत्यशक्तिरितीषत्स्पन्दनंस्मृतम् । तथास्मिन्नग्नीषोमशक्त्याविर्भावःप्रचक्षते ॥
तदग्नीषोमशक्त्युदयबोधकपदानिहि । चत्वार्यस्मिन्निर्णिनानिपदच्छेदनतःक्रमात् ॥
पूर्वोक्तचैत्यवेगोत्क्षेपणमादिपदात्स्मृतम् । द्वितीयपदतश्चाग्नीषोमशक्त्युदयस्स्मृतः ॥
चिच्छक्तिरीरितातेषुतृतीयपदतस्तथा । द्वीपदृष्टान्तमुक्त याच्चतुर्थपदतःक्रमात् ॥
पदानामर्थमुक्त्वाथसूत्रस्यैवंयथाक्रमम् । तथेदानींसंग्रहेणसामान्यार्थोनिरूप्यते॥
गुणत्रयप्रभेदेनचिच्छक्त्यांस्पन्दनत्रयम् । अभूत्क्रमात्स्वभावेनतान्समाहृत्यचित्स्वयम् ॥
पृथक्कृत्वागुणान्वेगादेकीकृत्यस्वतेजसा । स्वशक्तिगर्भमध्येथस्थापयामाससत्वरम् ॥

THE FOURTH APHORISM.

By the forcible jutting up of the three energies of Chaitya Shakti, Agnishoma Shakti evolves, just as an island comes up in the ocean by the explosion of the forces of Koorma Shakti. This is the fourth aphorism.

THE COMMENTARY.

In the previous aphorism it is established that the slight agitation (Ishat Spandana), evolved in Chichakti, is Chaitya Shakti. Now in this 4th aphorism the process of manifestation of Agnishoma Shakti will be dealt with.

This aphorism consists of four words determining the emanation of Agnishoma Shakti. The first of these words denotes the rapid flow (vega) of Chaitya Shakti, already mentioned. The second word determines the origin of Agnishoma Shakti. The third word refers to Chichakti. The fourth, cites the parallel of the island (Dvipah). This is the meaning of the words in the aphorism.

THE GENERAL SENSE.

In Chichakti, on account of the three different kinds of gunas or properties viz., Satwa, Raja and Tama, three kinds of

तथैवतद्वेगत्रयंचाहृत्यस्वीयतेजसा । एकीकृत्योर्ध्वप्रदेशेउत्क्षिपद्वेगतस्ततः ॥
पश्चात्त्रिवर्णसंयुक्तासृष्टिबीजस्वरूपिणी । पूर्वोक्ताग्नीषोमशक्तिस्तद्वेगोत्क्षेपणात्स्वयम् ॥
कूर्मशक्त्युक्षेपणेनयथाद्वीपोदयस्तथा । प्रादुर्बभूवपूर्वोक्तचिच्छक्त्यांपूर्वकल्पवत् ॥
सूत्रस्यैवंसंग्रहेणसामान्यार्थोनिरूपितः । इदानींतद्विशेषार्थःकिंचिदत्रप्रकीर्त्यते ॥

---

॥ द्वीपलक्षणमुक्तंद्वीपविवेके ॥

द्विधाविभज्योदकंयदूर्ध्वमागच्छति स्वतः । तद्द्वीपइतिशास्त्रेषुप्रवदन्तिमनीषिणः ॥

॥ उक्तंहिनामार्थकल्पे ॥

॥ १३ परिच्छेदः, ९ सूत्रम् ॥

# ॥ द्वीपःपञ्चवर्णविसर्गशक्तिसंमेळनादिति ॥

motion are naturally produced. The radiance of Atma attracted these motions, separated those gunas from the rapidity of those motions and then combining these gunas together by its radiance, located them in its own Sarvava Bhasaka or all-illuminating Shakti. Thereupon the radiance of Atma attracted the three kinds of Shakti of the above motions of the gunas, towards it by its own energy, combined them together and caused them to jet upwards rapidly. By the force of the emission of Chaitya Shakti, the said Agnishoma Shakti which is of the nature of the three colours white, red and black and which is in the form of the primordial seed of creation of the Universe was produced in Chichakti as in the previous kalpa, just as an island comes in to existence in the ocean by the forcible upward ejection of Koorma Shakti, a power which supports the terrestrial globe.

### THE DETAILED EXPLANATION.

According to Dvipa Viveka, a scientific work, the formation of an island takes place thus. The learned proclaim, in Shastras, that what splits up the water of the ocean into two and comes up of its own accord is known as an island (Dvipah). Maharshi Atri, in his Namartha kalpa gives the derivation and nomenclature of the Sanskrit word Dvipah, thus.

॥ विश्वंभरवृत्तिः ॥.

सूत्रेविसर्गसहितपञ्चवर्णाःप्रकीर्तिताः । तेविभज्यक्रमेणात्रपृथक्पृथङ्निरूप्यते ॥
द्वीपशब्देदुईवुप्अविसर्गाःपरस्परम् । मिळितास्सन्तिशास्त्रोक्तप्रकारेणयथाक्रमम् ॥
एतेसांकेतकाःप्रोक्ताश्शास्त्रेस्मिन्संप्रदायतः*। एतेषुवर्णसंकॢप्तशक्तयष्षड्घनास्स्मृताः ॥
आसांसंमेळनाद्वारिगर्भेद्वीपःप्रजायते ॥

---

॥ तदुक्तंशक्तितन्त्रे ॥

कौर्मी चकाश्यपीसिंहीतापनाबाडबौष्णिका । द्वीपोत्पत्तिकराह्येताः क्रमात्षड्घनशक्तयः ॥
इति ॥

॥ षट्शक्तिनिर्णयोक्तश्शक्तिसर्वस्वे ॥

कूर्मपीठाग्नेयकक्ष्यमुखसप्ततिमेक्रमात् । द्व्यशीतिकोट्यष्टलक्षपञ्चोत्तरसहस्रकाः ॥

THE 9TH APHORISM IN THE 13TH CHAPTER OF NAMARTHA KALPA.

By the action of the six powers indicated by the five letters and a visarga (two ciphers one below the other) water gets solidified and becomes an island. (Dvipah).

The meaning of this aphorism according to the commentary known as Viswambhara Vritti is this.

There are five letters and a visarga in this aphorism indicating the powers which go to form an island (Dvipah) and they are explained one by one thus. The Samskrit word Dvipah is derived by coalescing the letters D, V, I, P, A, H.* In the style of aphorisms, the above letters have been mentioned technically instead of the island-forming powers themselves, which are called "Jalaghana Shaktis"

According to Shakti Tantra these shaktis are:--

(1) Koorma Shakti (2) Kasyapee Shakti, (3) Simhika Shakti, (4) Thapani Shakti, (5) Badaba Shakti and (6) Aushnika Shakti.

---

*NOTE.—The English letter H is used here as being equivalent to the Samskrit visarga.

शक्तिप्रसारणकेन्द्ररेखास्सन्तिपृथक्पृथक् । तासुद्विकोटिविंशल्लक्षाष्टाविंशतिकेन्द्रतः ॥
छोटिकावच्छिन्नकालेशक्तयःपञ्चकोटयः । प्रसरन्त्यतिवेगेनजलकोशान्तरंप्रति ॥
पञ्चलक्षत्रिसाहस्रसप्तोत्तरशतात्मिका । घनशक्तिःक्रमात्तासुदवर्णेनात्रवर्णिता ॥
तथाकश्यपसूर्यस्यपीठपूर्वमुखान्तरे । न्यर्बुदानांपञ्चदशकोटीनांदशपञ्चच ॥
लक्षाणांपञ्चविंशत्तिसहस्रैकशतंक्रमात् । शक्तिप्रावाहिकमुखकेन्द्रास्सन्तिस्वभावतः ॥
तेषुत्रिशतकोटित्रिलक्षद्विशतकेन्द्रतः । छोटिकावच्छिन्नकालेशक्तयश्शतकोटयः ॥
प्रवहन्त्यतिवेगेनजलगर्भाशयंप्रति । विंशत्कोटित्रिलक्षद्विसहस्रैकशतात्मिका ॥
ईकारेणक्रमात्तासुघनशक्तिर्निरूपिता ॥

Shakti Sarvaswa, a scientific work determines the number of powers that each of these six shaktis possesses and which of them has the property of solidifying water and forming islands. We shall explain the same here as briefly as possible.

The six shaktis mentioned above are essential for the propagation of creation of the universe. Each of them has several centres through which proceed myriads of forces of seeds of creation. In each of these centres multitudes of powers come to existence. To determine the six Ghana Shaktis out of them it is necessary that the localities through which they proceed should be fixed. We shall therefore give an account of these six shaktis hereunder :—

I. In the 70th of the power-producing compartments (Shakti Prasarana Mukha Kendras) present in the South-East direction (Kakshya) of the said Koorma Shakti there are 82,08,01,005 different Power-begetting centres. From the 2,20,00,028th of these centres, five crores of powers evolve in a second and proceed rapidly towards the recesses (Koshas) of Bhuta water, present in the interior part of the earth (Bhugarbha). Of these the 5,03,107th is known as a ghana Shakti. It is this shakti that is indicated by the letter D in the word Dvipah.

II. In the same way, at the 8th of the power-producing faces of the North-East part of Badaba power of Bhuta water,

अम्भूतवाडवापीठेशान्यकक्ष्यमुखाष्टमे । द्विकोटिसप्तलक्षाष्टसहस्रत्रिशतात्मिकाः ॥
शक्तिप्रावाहिकमुखकेन्द्रास्सन्तियथाक्रमम् । तेष्वेककोटित्रिलक्षद्व्युत्तरशतकेन्द्रतः ॥
निमेषावच्छिन्नकालेशक्तयस्सप्तकोटयः । प्रवहन्त्यतिवेगेनजलगर्भान्तरंप्रति ॥
एकलक्षाष्टसाहस्रदशोत्तरशतात्मका । घनशक्तिःक्रमात्तासुवकारेणाभिवर्णिता ॥
अव्यक्तजलपीठस्थकक्ष्यवायव्यकेन्द्रतः । एकोनविंशत्कोटिचतुर्लक्षैकादशात्मकाः ॥
शक्त्युत्पत्तिस्थानमुखकेन्द्रास्सन्तियथाक्रमम् । तेषुद्वादशसाहस्रद्वात्रिंशतिमकेन्द्रतः ॥
निमेषकालमात्रेणद्वात्रिंशल्लक्षशक्तयः । प्रवहन्त्यतिवेगेनजलकोशान्तरंप्रति ॥
नवसाहस्रचत्वारिंशदुत्तरशतात्मिका । घनशक्तिःपवर्णेनतास्वत्रपरिकीर्तिता ॥
तापनाशक्तिपीठस्याग्नेयकक्ष्यमुखान्तरे । शतकोटिचतुर्लक्षनवोत्तरशतात्मिकाः ॥

there are 2,07,08,300 power-begetting centres. From the 1,03,00,102nd of those centres, 7 crores of Shaktis are produced in a second and run towards the reservoirs of water existing in the interior of the terrestrial globe. The 1,07,110th of them is a ghana shakti and it is represented by the letter V in the word Dvipah.

III. Similarly in the front part of the base of the solar globe of Kasyapa, there exist fifteen Nyarbudas, fifteen crores, twentyfive lakhs, two thousand and one hundred centres from which shaktis proceed. In the 300,03,00,200th of these centres, one hundred crores of shaktis are produced in a second and rapidly proceed towards the recesses of water existing in the interior part of the earth. Of those the 1,01,107th is a ghana shakti. It is this ghana shakti that is symbolised by the letter I in the word Dvipah.

IV. Again from the 12,032nd out of 19,04,00,011th power-producing centres existing at the North West face of the base of Avyakta water, 32 lakhs of powers come into existence in a second and run towards the abodes of water in the interior part of the earth. The 9,140th of them is a ghana shakti and it is symbolically represented here by the letter P in the word Dvipah.

V. Then again out of the 100,04,00,109 power-producing centres existing in the South-East face of the base of Thapana Shakti, the 132nd gives rise to 32 crores of powers in a second and

शक्तिप्रवाहमुखकेन्द्ररेखास्सन्तिहिक्रमात् । तासुद्वात्रिंशदुत्तरशतकेन्द्रमुखान्तरात्
निमेषावच्छिन्नकालेद्वात्रिंशत्कोटिशक्तयः । प्रसरन्त्यतिवेगेनजलशक्त्यन्तरंप्रति ॥
तासुद्विकोटित्रिलक्षोपरिपंचदशात्मिका । घनशक्तिःपकारोपरिस्थाकारेणवर्णिता ॥
अकाशसिंहिकाशक्तिकेन्द्ररेखाष्टकोटयः । तासुद्वात्रिंशदुत्तरशतकेन्द्रमुखान्तरात् ॥
अशीतिकोट्यष्टलक्षदशसाहस्रशक्तयः । प्रसरन्त्यतिवेगेनजलगर्भाशयंप्रति ॥
एकोनविंशदुत्तरत्रयोदशशतात्मिका । घनशक्तिर्विसर्गेणतासुसम्यगुदाहृता ॥
सूर्यदिक्कारवस्वग्निरुद्रसंख्याप्रमाणतः । उक्तषड्विधशक्तीनामंशमेळनतर्जले ॥

they find their way rapidly towards the recesses of water in the interior part of the earth. The 2, 03,00015th of those Shaktis is a ghana shakti and is represented by the letter A symbolically in the word Dvipah.

VI. Lastly, the 132nd out of the 8 crores of power-begetting centres of Simhika shakti in the sky, gives rise to 20 crores, 8 lakhs and ten thousand shaktis which make their way towards the storages of water in the interior part of the earth. Of them the 1310th namely ghana shakti is pointed out symbolically by the Visarga in the word Dvipah.

The component parts of these ghana shaktis—

Out of every 100 parts of

| | | | | |
|---|---|---|---|---|
| (1) | Koorma ghanashakti | | .... | 12 parts |
| (2) | Kasyapi | ,, | .... | 8 ,, |
| (3) | Simhika | ,, | .... | 27 ,, |
| (4) | Thapana | ,, | .... | 8 ,, |
| (5) | Badaba | ,, | .... | 3 ,, |
| (6) | Oushnika | ,, | ... | 11 ,, |

These six shaktis in their component parts, mixing with the (Bhuta) water existing in the recesses in the interior parts of the terrestrial globe, naturally give rise to an embryo of an island (Dvipah) in the form of solidified water ( Jalaghana ) in that Bhuta water.

This is how the learned expound the manner in which an island (Dvipah) is formed in oceans.

भूगर्भजलकोशेषुस्वतोजलघनात्मकः । गर्भोभवतितद्द्वीपइतिप्राहुर्मनीषिणः ॥
वाल्मीकिगणितरीत्यात्रोक्तश्शक्तिविनिर्णयः ॥

इत्यादि ॥

॥ ५ सूत्रम् ॥

## ॥ भवत्यस्यांत्रिगुणसाम्याच्चित्प्रातिबिंबाकर्षणं दर्पणवदेकोनत्रिंशन्न्यायेन ॥

॥ बोधानन्दवृत्तिः ॥

पूर्वसूत्रेग्नीषोमशक्त्याविर्भावःप्रकीर्तितः । तस्यांचित्प्रतिबिंबाकर्षणमस्मिन्निरूप्यते ॥
चित्प्रतिबिंबाकर्षणमत्रोत्रकपदानिहि । षण्णिर्णितानिविधिवत्पदच्छेदनतःक्रमात् ॥
तत्रादिमपदादग्नीषोमशक्तिर्निरूपिता । द्वितोयपदतस्तद्वत्तद्गुणत्रयमीरितम् ॥
एवंतृतीयपदतःप्रतिबिंबश्चितेस्स्मृत. । उक्तंदर्पगदृष्टान्तश्चतुर्थपदतःक्रमात् ॥
तथैवपञ्चमपदान्न्यायमानंनिरूपितम् । भवतीतियदुक्तंस्यात्तत्क्रियापदमुच्यते ॥

Thus goes the detailed explanation of the above aphorism.*

---

THE 5TH APHORISM.

According to the 19th axiom, the image of the splendour of Brahma, on account of the equipoise of the three gunas, is produced in Agnishoma shakti, just as the image of an object in a looking glass. This is the aphorism.

BODHANANDA'S COMMENTARY.

In the previous aphorism the emanation of the Agnishoma shakti has been explained. In this aphorism the process of production of the image of the splendour of Brahma in it will be explained.

---

***NOTE.—The commentator says that the number and order of the above shaktis and their component parts have been calculated according to the system of mathematics by Valmiki (Valmiki Ganita.)**

पदार्थमेवमुक्त्वाथसामान्यार्थोधुनोच्यते । रजस्सत्वतमोरूपगुणसाम्यत्वकारणात् ॥
According to the 87th axiom the splendour of Pratibimba or the reflected image (of Atma) does not increase when it revolves, since the Bimba and Pratibimba are identical. This is the aphorism.

BODHANANDA'S COMMENTARY:—

The absolute and changeless Paramatma who is in the form of splendour, got of His own accord, the two states viz., Bimba and Pratibimba, the former on account of His not joining with Upadhi i. e., Mayashakti emanated in Atma, and the latter by joining with it. That form of Atma which is the support of Mayashakti but which is not affected by it, is described in shastras by the learned as Bimba. This Bimba form of Atma is only apparent, inasmuch as it is not possessed of all the characteristics of a Bimba. This Bimba on account of the presence of the power of Atma, reflects in Maya, just as the moon in the ocean. The image of Bimba thus reflected

स्वस्मिन्नेवस्वभावेनकल्पयामाससत्वरम् । आत्मवत्प्रतिबिंबत्वंबिंबत्वंचतथैवहि ॥८॥
तत्प्रकाशस्यापिभवेदितिचेत्तन्नसंभवेत् । प्रकाशस्स्वस्वरूपत्वादात्मनःपरमार्थतः ॥९॥
तमात्मानंविनातस्यपृथग्रूपंयतोनहि । ततस्स्वप्रतिबिंबत्वंतस्यचित्प्रतिबिंबवत् ॥१०॥
उपाधिनासंवृतोपिपृथगाप्तुंनशक्यते । अतएवभ्रामणत्वसंसिद्धसत्यपिक्रमात् ॥११॥
प्रतिबिंबेप्रकाशाधिकत्वंनस्यात्स्वभावतः । नन्वात्मापरमानन्दस्वरूपइतिभूरिशः ॥१२॥
प्रवदन्तिस्ववाक्यैश्चश्रुतयःपरमार्थतः । तस्मात्प्रकाशरूपमितिवक्तुकथंभवेत् ॥१३॥
आनन्दोवाप्रकाशोवानिर्विकारेपरात्मनि । कथंभवेत्स्वस्वरूपमौपचारिकमेवतत् ॥१४॥
मधुरस्ययथारूपंलोकेमधुरितीर्यते । तथैवचात्मनोरूपंप्रकाशइतिसाश्रुतिः ॥१५॥
अनुग्रहार्थंब्रह्माभ्यासपराणामुवाचहि । स्वतस्स्वरूपाभावत्वात्प्रकाशप्रतिबिंबयोः ॥१६॥

in Maya is said to be Pratibimba or the reflected image. Thus by the mere presence of Atma, the Mayashakti by means of its illusive nature, causes the absolute Atma who is in the form of splendour, appears in it in the two forms, Bimba and Pratibimba (by the absence and the presence of Maya respectively) as real though delusive. In other words, the Mayashakti by its illusive nature, causes expansion of or increase in the form of Atma.

An objection may here be raised as follows:—It is said above that Atma is of the form of splendour. But vedic passages proclaim that He is of the form of supreme bliss. It is therefore improper to say that the form of Atma is splendour.

Well, the objection is quite right. For, how can the formless Atma have any form at all? Still it is usual in this world to say that a concrete body of the abstract quality of sweetness is honey. It is said so because the nature of sweetness cannot be realised in the absence of a concrete body, say for example honey. Similarly, the perceptible forms of splendour or bliss are only demonstrative of the Impersonal and Imperceptible Atma. This is only a contrivance made for the benefit of the seekers after Brahma, so that they may be provided with a definite form to meditate upon and realise the Imperceptible though the Perceptible. Thus the statement "Atma is of the form of splendour" is accepted only hypothetically (Aupacharika).

तावुभावात्ममात्रेणवर्तेतेपरमात्मनि । एकत्वादात्ममात्रेणचिद्बिंबप्रतिबिंबयोः ॥१७॥
तथैवतत्प्रकाशस्याप्येकत्वाच्चस्वरूपतः । प्रतिबिंबेप्रकाशाधिकत्वंनैवभवेत्स्वतः ॥१८॥
अविनाभावरूपत्वात्प्रकाशपरमात्मनोः । आत्मवत्प्रतिबिंबत्वंप्रकाशस्याप्युपाधिना ॥१९॥
संभवत्येवतस्मात्तत्प्रतिबिंबेस्वभावतः । भवितव्यमेवप्रकाशाधिकत्वमपिक्रमात् ॥९०॥
तस्मत्प्राकाशाधिकत्वंप्रतिबिंबेनिरूपितम् । यत्प्रकाशाधिकत्वमसिद्धमित्यभिवर्णितम् ॥२१॥
तदसिद्धमेवभवत्युपाधिग्रहणात्स्वतः । इतिचेन्न्यायसूत्रस्यविरोधोभवतिक्रमात् ॥२२॥
अतएवप्रकाशाधिकत्वासिद्धत्वमेवहि । एतत्सूत्रेणविधिवत्सिद्धान्तत्वेनवर्णितम् ॥२३॥
एवमुक्त्वासमासेनसामान्यार्थोयथाक्रमम् । विशेषार्थोद्यसूत्रस्ययथामतिनिरूप्यते ॥२४॥

॥ विशेषार्थः ॥

सप्ताशीतिन्यायमितिसूत्रेयत्प्रतिपादितम् । तद्विविच्ययथाशास्त्रंसंग्रहात्संप्रचक्षते ॥२५॥

It may here be contended again that if splendour is accepted to be the form of Atma, though hypothetically, it then becomes necessary that the splendour of Atma by the action of upadhi, should also get Bimba and Pratibimba or expansion of form, even as Atma Himself. If so increase of splendour should result in the Pratibimba of Atma.

This contention is answered thus: Well, splendour is the natural form of Atma. That is to say Atma and splendour are identical and so the latter has no independent existence apart from Atma. So, though the splendour is affected by upadhi, it cannot have a Pratibimba, just as Atma. Since Bimba and Pratibimba of Atma are produced only in presence of Atma and since they can have no existence independent of Atma, they become identical with Atma. Thus the Bimba and Pratibimba are as much of Atma, as of splendour. It cannot therefore have independent Bimba and Pratibimba. Thus the splendour can never have increase of form, though affected by upadhi.

Again the fact that increase of splendour results in Pratibimba is contradictory to the 87th axiom. In this aphorism. therefore it is established that increase of splendour does not result in the Pratibimba. This is the general sense of the aphorism.

॥ स्वतस्सिद्धन्यायसूत्रम् ८७ ॥

# ॥ स्वप्रकाशात्स्वस्यप्रतिबिंबत्वसंभवत्वेपि-तस्यप्रकाशाधिक्यसंभवोनस्या त्सूर्यप्रतिबिं-बवत् ॥

॥ विश्वंभर वृत्तिः ॥

स्वयंप्रकाशमानत्वंसूर्यस्यसहजंस्मृतम् । तस्मात्तस्यस्वप्रकाशादेवसम्यग्जलादिषु ॥२५॥
आत्मवत्प्रतिबिंबत्वंस्वभावाद्भवतिक्रमात् । तस्मात्सूर्यस्यरूपाधिकत्वंस्वप्रतिबिंबतः ॥२६॥
स्वसन्निधानमात्रेणस्वोपाधौकल्पितंभवेत् । उपाधिमात्रमेवात्रकारणंनस्वभावतः ॥२७॥

THE DETAILED EXPLANATION.

For this purpose we shall quote the 7th axiom referred to in the aphorism and explain it systematically but succinctly.

The 87th Axiom.

Though a luminous body gets a Pratibimba on account of its radiance, it cannot get increase of splendour just as the reflected image of the sun does not.

VISWAMBHARA'S COMMENTARY:—

The sun is naturally a self-luminous body. His likeness is therefore reflected naturally on account of his radiance, in such upadhis as glass or water. Thus the increase of form of the sun is caused on account of his image being reflected in upadhi by his mere presence. Well now, the increase of the form of the image of Atma is due to upadhi and so it is only apparent, but not the real state of Atma.

It may be contended here that increase of splendour must result in the sun just as the increase of his form, that is, the multiplicity of his image in upadhis. But this is not possible. For, the reflected image has no independent form and existence,

स्वस्वरूपाधिकत्वंस्वप्रतिबिंबाद्यथाभवेत् । तथैवस्वप्रकाशाधिकत्वंस्यादितिचेन्नतत् ॥२८॥
यतस्स्वरूपाभावत्वंकल्पिततत्वमुपाधिना । उक्तस्यात्प्रतिबिंबस्यतस्मिन्मिथ्यात्मकेततः ॥२९॥
रूपवत्स्वप्रकाशाधिकत्वंनस्यात्स्वभावतः । इतिसप्ताशीतितमन्यायसूत्रविनिर्णयः ॥३०॥
एवंषोडशसूत्रार्थस्संग्रहेणनिरूपितः ॥

॥सूत्रम् १७ ॥

## ॥ तदधिकत्वमुपाधिभेदाद्रंजिकादित्यवत् ॥

॥ बो. वृ ॥

पूर्वसूत्रेप्रकाशाधिक्यमसिद्धमितीरितम् । अस्मिन्प्रकाशाधिकत्वकारणंसन्निरूप्यते ॥१६॥
प्रतिबिंबेप्रकाशाधिकत्वकारणनिर्णये । सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम् ॥१७॥
तत्रादिमपदात्सम्यक्प्रकाशःपरिकीर्तितः । द्वितीयपदतस्तस्याधिकत्वंसंप्रदर्शितम् ॥१८॥
तृतीयपदतोपाधिकारणंसूचिततथा । चतुर्थपदतस्तस्यदृष्टान्तस्सन्निदर्शितः ॥१९॥

they being manifest only on account of upadhi. Similarly Paramatma gets by His splendour, multiplicity of His form on account of the Maya upadhi. But at the same time no increase of splendour is possible in the reflected image of Atma, as illustrated in the case of the reflected image of the sun. This is what the 87th axiom establishes.

Thus ends the commentary on the 16th aphorism.

APHORISM 17.

The image of Atma gets its splendour enhanced just as the image of the sun reflected in Ranjika glass. This is the 17th aphorism.

THE COMMENTARY.

It has been established by the previous aphorism that increase of splendour cannot take place in the reflected image of Atma. This aphorism, however, disproves that statement and establishes that the said increase does result. This aphorism is composed of four words. The first of these words names the splendour. The second, mentions the increase of it. The third word points out the Upadhi, which gives rise to the

पदानामेवमुक्त्वार्थस्संप्रदायानुसारतः । सामान्यार्थोऽस्यसूत्रस्यसंग्रहात्संप्रचक्षते ॥२०॥

॥ सामान्यार्थः ॥

पूर्वसूत्रेप्रकाशस्यात्मस्वरूपत्वकारणात् । आत्मनःप्रतिबिंबेप्रकाशाधिक्यंनिषेधितम् ॥१॥
तन्निराकृत्यसूत्रेस्मिन्प्रतिबिंबेपरात्मनः । उक्तप्रकाशाधिकत्वमेवदृढयतिक्रमात् ॥२॥
आदित्यप्रतिबिंबस्ययथारंजिकदर्पणे । स्वप्रकाशाधिकत्वंस्यात्तथैवोपाधिभेदतः ॥३॥
उक्तप्रकाशाधिकत्वंप्रतिबिंबेपरात्मनः । भवत्येवस्वभावेनपूर्वोक्तात्मैक्यकारणात् ॥४॥

॥ तदुक्तंसौदामिनी कलायाम् ॥

सजातीयप्रकाशाव भासितद्वयवस्तुनोः । प्रकाशाधिक्यमेकस्मिन्नितरेल्पप्रकाशता ॥५॥
स्थित्वान्योन्याभिमुखत्वंभवेद्यदातयोःक्रमात् । तदाबृहत्प्रकाशोल्पप्रकाशमपकर्षति ॥६॥

increase of splendour. The fourth word offers an illustration to prove the above fact. This is the meaning of the words taken severally.

### The General Sense.

The previous aphorism has established that on account of the identity of Atma with splendour, increase of splendour in the reflected image of Atma does not result. Referring to the condition of the image of the sun reflected in a particular kind of glass or lens known as Ranjika where the increase of splendour does result, this aphorism tries to falsify the conclusion of the previous aphorism and to prove likewise that the image of Atma does get increased splendour.

Having thus proved the increase of splendour in the image of Atma, the author quotes some other authorities in support of his theory.

Maharshi Matanga in his Saudamini Kala observes as follows:—When two objects possessing the same kind of light-one major or having a greater quantity of light and the other minor or having a lesser quantity of it-are brought face to face, the light of the major object attracts that of the minor one. The minor object, however, without allowing its lustre to be

अल्पप्रकाशाधिष्ठानवस्तुस्त्वंस्मिन्ततःक्रमात् । स्वप्रकाशंसमाकृष्यधारयत्यचलंयथा ॥७॥
स्वल्पसंकोचहेतुत्वादल्पप्रकाशवस्तुनि । व्याप्तुंसंपूर्णतोनस्याद्बृहत्प्रकाशवस्तुनः ॥८॥
अतःपराङ्मुखोभूत्वास्वस्थानंप्रतिवेगतः । तिर्यग्गच्छत्यूर्ध्वमुखंतत्प्रकाशोस्वभावतः ॥९॥
पश्चादल्पप्रकाशस्तत्प्रकाशंस्वीयशक्तितः । सजातीयस्वभावत्वात्समाकर्षतिवेगतः ॥१०॥
तथापितंसमाहर्तुंनशशाकस्वशक्तितः । तस्मात्तत्प्रतिबिंबंस्वतेजसातत्स्वरूपवत् ॥११॥
समादायातिवेगेनस्वस्थानेसन्नियोजयेत् । प्रकाशद्वयमध्येतत्प्रतिबिंबस्ततस्स्वयम् ॥१२॥
वर्ततेस्वस्वरूपेणबृहत्प्रकाशबिंबवत् । पश्चात्स्वकिरणैस्तत्प्रकाशौद्वावपिचक्रमात् ॥१३॥
व्याप्यतस्यान्तर्बहिश्चप्रकाशयतितेजसा । तेनतत्प्रतिबिंबेपूर्वप्रकाशादपिक्रमात् ॥१४॥
भवेत्प्रकाशाधिकत्वंबृहत्प्रकाशबिंबवत् ॥

॥ इत्यादि ॥

thus attracted, retains it within itself and keeps it at rest. The light of the major object then will not have space enough in the minor object to Pervade it. It therefore retracts to its abode. The light of the minor object at the same time, being of the same kind, tries to attract the light of the major object which is retracting from it. Thus though the light of the minor object cannot succeed in attracting the light of the major one, yet it receives the exact likeness or photograph of the major object and impresses it on the object from which it (the light) proceeds. The image or the exact likeness of the major object is thus located between the two lights, whereby it is illumined by the light of the rays of the two objects from above and below. By this the image appears as getting a greater degree of light than it had originally.

A similar account is given in Srushtivilasa also thus:—

When two lights come face to face, the two objects from which the lights proceed catch the images of each other and the images thus reflected in the two objects appear, on account of the combination of the two lights, to have increased light.

॥ सृष्टिविलासेपि ॥

प्रकाशद्वयसंयोगात्तदधिष्ठानवस्तुनोः । प्रभवेत्प्रतिबिंबत्वमुभयत्रपरस्परम् ॥२१॥
अतःप्रकाशाधिकत्वंप्रतिबिंबेभवेत्स्वतः ॥ ॥२२॥

॥ इत्यादि ॥

॥ ज्योतिर्विलासेप्येवमेवोक्तम् ॥

प्रकाशद्वयसंयोगेतदधिष्ठानवस्तुनोःपरस्पर मुभयत्रप्रतिबिंबोभवति । प्रकाशोद्विधा ॥ विशेषसामान्यभेदात् । तत्रविशेषप्रकाश विशिष्टादर्पणादयः । विशेषोनाम, दहन, पचन

Jyotirvilasa, another scientific work deals with this point which goes to corroborate the above statement further, thus:—

When two objects having light in them come face to face, the one catches the likeness of the other reciprocally.

After stating this theory the author of this work narrates, up to the end of the third Gucha or chapter of his work, an elaborate discussion which he entered into with an opponent, who contradicted his theory and whom he satisfied by proving the falsity of his objection. It is a long discussion occupying a lot of space and so we shall give here a very brief account of it.

The point of refutation raised by the opponent is this:—

"Well, according to your statement wherever the light of two objects, in opposite directions meets, the objects emitting the light should catch the likeness of each other. Now let the two objects of light be the sun and fire. Suppose fire is made to burn in the sun-light. The light of fire, of course, combines with that of the sun. According to your theory therefore, the fire must catch the likeness of the sun and vice versa. But it is evident that it is not so. In this way your theory has been proved false."

Accepting this objection the author tries to refute it and to establish his own theory, thus—

"Well, learned opponent, it passes my understanding whether

न्वलनभानोष्णवेगविशिष्टप्रकाशो विशेषप्रकाशः । सामान्योनाम, एतद्गुणरहितप्रकाश स्सामान्यः । विशेषोपिद्विधा, सावरणो, निरावरणश्चेति । तत्रसावरणोग्न्यादीनाम् । निरावरणस्त्वात्मसूर्यादीनाम् । अनयोःपरस्परंप्रतिबिंबत्वंनास्ति । विजातीयप्रकाशत्वात् । सजातीयप्रकाशविशिष्टवस्तूनामप्येवमेवप्रतिबिंबाभावः । समानत्वात् । सामान्योपिद्विधा, बाह्याभ्यान्तरभेदात् । तत्रबाह्यप्रकाशोदर्पणादीनाम् आभ्यन्तरप्रकाशःपर्वतादीनाम् । उभयत्रविशेषप्रकाशसद्भावेपिपर्वतादिषुदर्पणादीनांप्रतिबिंबत्वंनास्ति । आकर्षणाशक्त्यभावात् ।

you make bold to launch your objection on my statement, after studying my theory carefully and in full or whether you are blurting out whatever comes uppermost to your lips without reference to the context and merely to satisfy your love of vain discussion. Should it be the latter, it is not worth while arguing with you. Granting that it is the former, I shall try to clear your ignorance and enlighten you on this point. Try to follow me if you can, now at least.

" In the first place the gist of your objection is only a part of the reasoning of my theory. Note this. Light,by nature, is of two kinds, Visesha or major and Samanya or minor; Paramatma and Surya being examples of the former and glass diamond etc., of the latter. The properties of the former are, burning, boiling, blazing, shining, heating, Vega or speed etc., while that of the latter is mere shining. The major light is again of two kinds viz., Savarana and Niravarana, fire and lamp lights being the examples of the former, and Paramatma and the sun, of the latter. When an object possessing light of the first kind is placed face to face with that of the second, as in the case of the sun and fire, neither of them catches the likeness of the other on account of the dissimilarity of the light in them. Similarly no two objects possessing similar light can catch each other's likeness.

"The Samanya Prakasa or ordinary light is again of two kinds viz., Bahya prakasa or external light and Abhyantara Prakasa or internal light, glass and similar objects, belonging to the firts set and mountains and the like, to the second. Objects

पर्वतादीनां दर्पणादिषु प्रतिबिंबोभवति । आकर्षणाशक्तिसद्भावात् । एवमेवविशेषप्रकाश विशिष्टवस्तूनांसामान्यप्रकाश विशिष्टवस्तुषुप्रतिबिंबोभवति । प्रकाशस्यन्यूनाधिकप्रभेदात् तद्यथेतिचेत् । प्रकृत्यामात्मवत् ॥

इत्यादिशास्त्रप्रमाणैः प्रतिबिंबात्मनिक्रमात्। प्रकाशाधिक्यसंसिद्धिर्भवेद्यस्मात्स्वभावतः ॥

तस्मात्प्रकाशाधिक्यत्वमसिद्धमितियत्स्मृतम्। तत्प्रमाणानुभूत्योर्विरुद्धत्वात्सन्निराकृतम् ॥

of internal light since they have no power (shining surface) to catch the images of objects, cannot do so. The objects of external light on the other hand can catch the likeness of objects since they have power to catch the images of objects, of course, in the presence of a major light.

"Again objects of minor light can catch the likeness of objects of major light on account of the difference in the degree of light in them. The most popular illustrations of this fact are (1) Prakriti catching the likeness of Paramatma and (2) Ranjika glass, of the sun.

"By this it is clear what kind of lights catch the likeness of objects and what kind do not. Again it is clearly explained that the sun and fire are regarded as bodies of major light and that objects of similar light cannot catch each other's images. Thus, o ! erudite opponent, your objection only betrays your ignorance of my theory. In conclusion it has been established that production of the image or the likeness of an object is caused by the combination of two kinds of light as noted above, of course, only in the presence of a major light. Further it has also been proved that the reflected image of Atma does get increased splendour. So the objection raised in contradiction to this fact has been refuted. Thus it has been proved not only on the authority of shastras but also of practical observation that the reflected image of Atma gets increased splendour."

The composition and the process of preparation of Ranjika glass has been described in Darpana Prakarana, thus.

॥ रंजिकदर्पणमुक्तं दर्पणप्रकरणे ॥

स्फाटिकपारदसैकतसज्जीकारोधुंडिकशल्यविरंचिः । कंदरकर्बुरमाक्षिकवज्रोमौक्तिकदन्त सुरंजिकनागः । चांद्रिकसौरिकभामुखरौद्रोगारुडगैरिकफेनगुहारिः ॥ उडुषोडशद्वात्रिंशत्पंचद्वाविंशतिमुनिवसुरुद्रोग्निः । ऋतुबाणार्काष्टादशवेदास्सप्तदशानल ऋतुपंचदश । एवंग्रहगुणसायकपंचविभागांशानाहृत्यविधानात् । सम्यक्संशोध्यततस्तुलयासंतोल्यसंप्रदा-

The following table gives the names and the component parts of the ingredients required for preparing glass known as Ranjika.

| | Names of substances. | Component parts. | |
|---|---|---|---|
| 1. | Sphatica | 27 | Parts |
| 2. | Parada (mercury) | 16 | ,, |
| 3. | Saikata (sand) | 32 | ,, |
| 4. | Sajjeekara | 5 | ,, |
| 5. | Dhundica | 22 | ,, |
| 6. | Salya (bones of Vertebrate creatures) | 7 | ,, |
| 7. | Viranchi | 8 | ,, |
| 8. | Kandara | 11 | ,, |
| 9. | Karbura | 3 | ,, |
| 10. | Makshica | 6 | ,, |
| 11. | Vajra (diamond) | 5 | ,, |
| 12. | Mauktica (pearls) | 12 | ,, |
| 13. | Danta (ivory) | 18 | ,, |
| 14. | Suranjaka | 4 | ,, |
| 15. | Naga | 17 | ,, |
| 16. | Chandrica (silver) | 3 | ,, |
| 17. | Saurica | 6 | ,, |
| 18. | Bhamukha | 5 | ,, |
| 19. | Raudra | 10 | ,, |
| 20. | Garuda | 9 | ,, |
| 21. | Gairica | 3 | ,, |
| 22. | Phena | 5 | ,, |
| 23. | Guhari | 5 | ,, |

येना । संपूर्यगारुडास्यमुखमूषामध्येयथोक्तविधिनाच । कूर्मव्यासटिकायांमध्येनिक्षिप्येंगाल-पाषाणमृत्पिंडैः । संगाल्यवेगतोद्विमुखीभस्त्रात्त्रिशतकक्ष्योष्णमानेन । आदर्शकयंत्रगर्भमुख बिलमध्येसंपूरयेच्छिन्नैश्शनैः पश्चात् । एवंकृतेतिशुद्धोनिर्मलरूपोमहाप्रकाशयुतः । पंचसहस्रज्योतिसमानद्युतियुतोभवतिरंजिकादर्शः ॥

॥ इत्यादि ॥

---

॥ सूत्रम् १८ ॥

## ॥ तस्मात्तद्द्विगुणतमसोपकर्षणंपूर्ववत् ॥

॥ बो. वृ. ॥

भानाधिक्यंपूर्वसूत्रात्प्रतिबिंबेदृढीकृतम् । तस्मादस्मिन्तत्प्रकाशाद्द्विगुणाधिकतःक्रमात् ॥

Procure these substances, purify them duly and weigh them in their adequate parts as detailed above. Fill them in a crucible called Garuda and place it in a furance known as Koorma Vyasatica. Cover it up with coal, pieces of certain kinds of stone and mud to produce a high degree of heat. Blow it with bellows known as Dwimukhee Bhastrica till the heat rises to 300 Kakshyas, when the ingredients melt and become a liquid. Pour it slowly on the surface of an apparatus used in manufacturing glass. When cooled you will get glass which can magnify light (falling on it) to the power of 1000 Jyotis. *

Thus ends the commentary on the 17th aphorism.

### Aphorism 18.

The radiance, as in the previous case, attracted twice as much as the original quantity of darkness. This is the aphorism.

### The Commentary.

The previous aphorism has established the increase of splendour in the reflected image of Atma. This aphorism aims at explaining authoritatively that extra darkness amounting to twice

---

* Note :—One Jyoti is capable of illuminating an area of 64 **Prankanas.**

ध्वांतापकर्षणंसम्यग्यथाशास्त्रंप्रकीर्त्यते । तमोपकर्षणप्रबोधकानित्रीण्यथाक्रमम् ॥२॥
पदानिनिर्णितान्यस्मिन्संप्रदायानुसारतः । उक्तप्रकाशाधिकत्वंतत्रादिमपदात्स्मृतम् ॥३॥
द्वितीयपदतस्तध्वांतापकर्षणमीरितम् । तृतीयपदतःपूर्वदृष्टान्तस्सन्निदर्शितः ॥४॥
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥

॥ सामान्यार्थः ॥

प्रतिबिंबेप्रकाशाधिकत्वहेतोस्स्वभावतः । तत्प्रकाशाद्द्विगुणिततमसस्तेनकर्षणम् ॥
क्रमान्नवमसूत्रोक्तन्यायमानानुसारतः । अभूत्पश्चात्तत्प्रकाशमावृणोत्तत्तमःक्रमात् ॥
स्वतस्सिद्धन्यायमानंनवमेसंप्रदर्शितम् । एवमष्टादशसूत्रस्यार्थस्सम्यङ्निरूपितः ॥
विशेषार्थोस्यसूत्रस्यमनागपिनविद्यते ॥

the original quantity was attracted by the said increased splendour.

This aphorism is made up of three words dealing with the attraction of darkness. The first of these words refers to the increased splendour spoken of in the preceding aphorism. The second word states the process of attraction of the darkness. The third word points out the example given in the 9th aphorism.

This is the word meaning of the aphorism.

### The General Sense.

As a natural consequence of the increase of splendour in the reflected image of Atma, the splendour attracted twice the quantity of the original darkness, in accordance with the axiom quoted in connection with the 9th aphorism. This darkness thereupon covered the splendour itself gradually. The axiom referred to has been quoted and explained in connection with the 9th aphorism. This is the general sense of the 18th aphorism which needs no detailed explanation.

॥ सूत्रम् १९ ॥

## ॥ अतःपूर्वस्मादप्यष्टांशाधिकत्वंत्रयोदशन्यायेन ॥

॥ बो. वृ ॥

ध्वांतापकर्षणंप्रोक्तंप्रकाशाधिक्यतःपुरा । अथेदानींतत्प्रमाणमस्मिन्सूत्रेनिरूप्यते ॥१॥
प्रमाणबोधकपदान्यस्मिन्पंचयथाक्रमम् । पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि ॥२॥
तत्रादिमपदात्तत्कारणंसम्यक्प्रदर्शितम् । द्वितीयपदतःपूर्वोक्ताव्यक्तध्वांतमीरितम् ॥३॥
तृतीयपदतस्संबंधकाव्ययमुदाहृतम् । चतुर्थपदतोध्वांताधिक्यमानंप्रदर्शितम् ॥४॥
तथैवपंचमपदात्स्वतस्सिद्धोनिरूपितः । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥५॥

APHORISM 19.

By this eight times more than the original darkness resulted in the Avyakta enclosure in consonance with the 13th axiom. This is the aphorism.

THE COMMENTARY.

The fact that darkness was attracted into the Avyakta enclosure on account of the increased splendour, has been explained in the previous aphorism. The amount of the darkness thus attracted (a second time) will be defined in this aphorism.

In this aphorism there are five words which deal with the increased quantity of the darkness. The first word states the cause for the increase of darkness; the second word refers to the darkness of Avyakta already stated; the third word is a connective; the fourth word gives the measurement of the increased quantity of the darkness; the fifth word alludes to the thirteenth axiom. This is the meaning of the words in the aphorism.

॥ सामान्यार्थः ॥

परस्पराकर्षणेनध्वांतयोरुभयोःक्रमात् । यतस्सम्मेळनमभूदतःपश्चात्स्वभावतः ॥
यावत्प्रमाणमव्यक्तावरणेसंस्थितंपुरा । तस्मादप्यष्टभागांशाधिकंतमस्स्वभावतः ॥
त्रयोदशस्वतस्सिद्धन्यायमानानुसारतः । क्रमादभूत्पुनंस्तस्मिन्ध्वांताधिकमतस्स्मृतम् ॥
एवंसामान्यार्थमुक्त्वासूत्रस्यास्ययथाक्रमम् । त्रयोदशस्वतस्सिद्धन्यायमद्यविविच्यते ॥

॥ स्वतस्सिद्धन्यायसूत्रम् १३ ॥

# ॥ विभाजितनिरंशवस्तुनोःपरस्परापकर्षणं सहजम् ॥

॥ विश्वंभरवृत्तिः ॥

निरंशस्वांशप्रभेदाद्वस्तुलोकेद्विधास्मृतम् । अंशोनामंगइत्याहुश्शास्त्रेषुज्ञानवित्तमाः ॥

THE GENERAL SENSE.

The darkness of Avyakta and of Moola prakriti got intermingled on account of their mutual attraction. As a natural consequence of this the darkness of Avyakta increased in quantity to eight times the original size, in consonance with the thirteenth axiom. This aphorism has thus calculated the exact measurement of the extra or additional quantity of the darkness. This is the purport of the aphorism.

THE DETAILED EXPLANATION OF
THE THIRTEENTH AXIOM.

It is natural that the two portions into which a Niramsa thing is divided attract each other.

VISWAMBHARA'S COMMENTARY.

Things under creation are of two kinds viz., Niramsa and Samsa. The learned proclaim in shastras that Amsa means Anga or a limb. So things with limbs such as human beings, animals, birds, trees etc , belong to the Samsa type ; while things without limbs such as darkness, light, akasa etc., belong to the Niramsa type. Of these, things of the former kind i.e., things

वस्तूनितद्विशिष्टानिसांशानीतिविदुर्बुधाः । वस्तूनितद्विहीनानिनिरंशानीतिचक्रमात् ॥
नृपक्ष्यगमृगाद्यास्तुतयोस्सांशाइतीरिताः । ध्वांतप्रकाशाकाशाद्यानिरंशाइतिकीर्तिताः ॥
सांगोपांगविशिष्टस्वरूपाणांसांशवस्तुनाम् । व्यापकत्वंस्वप्रदेशमन्तरानहिविद्यते ॥
सांगोपांगविहीनानांध्वांताकाशादिवस्तुनाम् । स्वस्वरूपंविनाव्यापकत्वंसर्वत्रविद्यते ॥
उपाधिनिरुपाधिभ्यांसांगानामंगसंचयः । विभाजितोपिचतयोःपरस्पराकर्षणम् ॥
अव्यापकस्वरूपत्वान्नास्तिकिंचिदपिस्वतः । ध्वांतप्रकाशाकाशाश्चोपाधिनाभेदिताअपि ॥

with limbs can only pervade within the space they occupy exclusively. Contrarily things of the latter class i.e., things having no limbs are capable of pervading on all sides but not within their own form. Thus when the limbs of a certain Sanga thing are separated by an Upadhi, the disconnected members of the thing are utterly powerless to pervade or attract each other. Contrarily though darkness, light etc., are (or are caused to appear as) divided, yet the divisions thereof have a natural and mutual tendency and inseparable affinity to each other, to unite together. In this way, since darkness belongs to the Niramsa group of things having the property of all-pervasiveness, it does not allow itself to be divided by any upadhi. And even if it be reckoned as divided on account of upadhi, the portions which thus appear as divided are capable of combining together.

Well, an illustration will make this point clearer.

Suppose a glass-box is placed in a dark room. Then the box or upadhi shuts out, a portion of the darkness of the room whereby this appears as divided on account of the said upadhi, the glass box. But in fact the darkness is not at all divided. For if the box is removed from the room darkness is not removed with it but is still present there as before, irrespective of the presence or absence of the box. It is therefore evident that darkness does not allow itself to exist as

निरंशकस्वरूपत्वादविनाभावतःक्रमात् । परस्परापकर्षणंभवेत्तयोस्स्वभावतः ॥
निरंशत्वाद्व्यापकत्वाद्विभागत्वमुपाधिना । नसंभवेत्किंचिदपितमसस्सर्वथाखलु ॥
उपाधिनाभेदितवद्भ्रांत्यादृष्टमपिक्रमात् । स्वस्यव्यापकशक्त्योपाधिस्थध्वांतापकर्षणम् ॥
निरंशकत्वात्तमसस्सहजंस्यादितिक्रमात् । त्रयोदशस्तस्मिन्द्धन्यायसूत्रविनिर्णयः ॥

॥ सूत्रम् २० ॥

## ॥ निरंशत्वात्तमप्रकाशयोरन्योन्यव्यापकत्वावकाशस्त्र्युत्तरशतन्यायेन ॥

॥ बो. वृ ॥

पूर्वसूत्रेतमोविक्यमव्यक्तावरणेस्मृतम् । व्यापकत्वावकाशत्वंप्रकाशध्वांतयोस्स्वतः ॥१॥
परस्पराकीर्त्यतेस्मिन्सूत्रेसम्यग्यथाक्रमम् । व्यापकत्वावकाशप्रबोधकानिपदानितु ॥२॥

divided in spite of the upadhi viz., the glass box or the like. Well even granting that it exists as divided on account of the box, the darkness of the room is capable of attracting and combining with that portion of the darkness which appeared as divided from the darkness of the room, by the presence of the box.

Thus the thirteenth axiom lays it down as a self-evident truth that darkness, inasmuch as it is a Niramsa thing, is capable of attracting and uniting with that portion of the darkness which appears as divided and separated by upadhi, from the aggregate darkness. This is the commentary on the 13th axiom.

---

APHORISM 20.

Being Niramsa things, there is possibility for Darkness and Light to penetrate into each other naturally and this fact has been clearly proved in the 103rd axiom. This is the aphorism.

चत्वारिनिर्णितानिस्युस्सूत्रेस्मिन्विधिवत्क्रमात् । तत्रादिमपदात्तस्मिन्निरंशत्वंप्रदर्शितम् ॥३॥
द्वितीयपदतोध्वांतप्रकाशौसन्निरूपितौ । अन्योन्यव्यापकत्वावकाशःप्रोक्तस्तृतीयतः ॥४॥
स्वतस्सिद्धन्यायमानंचतुर्थपदतस्स्मृतम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोनिरूप्यते ॥५॥

॥ सामान्यार्थः ॥

निरंशत्वंव्यापकत्वंतमःप्रकाशयोःक्रमात् । स्वभावमितिशास्त्रेस्मिन्पूर्वमेवनिरूपितम् ॥६॥
तस्मात्त्युत्तरशतस्वतस्सिद्धप्रमाणतः । क्रमात्प्रकाशस्तमसिप्रकाशेपितमस्तथा ॥७॥
सर्वव्यापकशक्तित्वान्निरंत्त्युवाच्चकेवलम् । प्राप्तुमन्योन्यावकाशोभवेत्सम्यक्स्वभावतः ॥८॥
एवमुक्तंसमासेनसामान्यार्थोयथाक्रमम् । विशेषार्थोस्यविधिवत्संग्रहेणनिरूप्यते ॥९॥

### THE COMMENTARY.

Enlargement of the dimensions of darkness in the Avyakta enclosure has been proved in the previous aphorism. Capability of darkness and light to penetrate into each other and to combine together will be dealt with in this aphorism.

This aphorism consists of four words dealing with the said penetration. The first word says that darkness and light are Niramsa things. The second word names the two things darkness and light. The third word mentions the possibility of mutual penetration of darkness and light. The fourth word refers to the 103rd axiom.

Having thus given the meanings of the words of the aphorism we shall pass on to its general sense.

### THE GENERAL SENSE.

It has already been stated in the 13th axiom that darkness and light belong to Niramsa type and that like things (light with light and darkness with darkness and so on) penetrate into one another and combine together. Now this 103rd axiom establishes that the unlike things, darkness and light, inasmuch as they are of Niramsa kind, are also capable of penetrating into each other and combining into one. This is the general sense of the aphorism.

॥ विशेषार्थः ॥

यस्त्र्युत्तरशतन्यायमितिसूत्रेनिरूपितम् । विविच्यतन्न्यायमत्रयथाशास्त्रंनिरूप्यते ॥१०॥

॥ स्वतस्सिद्धन्यायसूत्रम् १०३ ॥

# ॥ विजातीयस्वरूपत्वेऽपिनिरंशवस्तुनोरन्यो-न्यव्यापकत्वंसहजम् ॥

॥ विश्वंभरवृत्तिः ॥

सजातीयस्वरूपोवाविजातीयोथवाक्रमात । योत्राकोवाभवेद्वस्तुतयोस्सम्यक्स्वभावतः ॥११॥

निरंशत्वव्यापकत्वस्वभावोविद्यतेयदि । विजातीयस्वरूपोपितयोरन्योन्यतःक्रमात् ॥१२॥

स्वभावतोव्यापकत्वंभवत्येवनसंशयः । इतिस्वतस्सिद्धसूत्रन्ययमानविनिर्णयः ॥१३॥

॥ सूत्रम् २१ ॥

# ॥ अतएवस्यात्परस्परंव्याप्तिरुभयत्र ॥

THE DETAILED EXPLANATION.

The 103rd axiom mentioned in the aphorism will be explained below:—

Niramsa things, though they are unlike ones, are naturally capable of penetrating into one another. This is the axiom.

THE COMMENTARY.

If two like or unlike things are of Niramsa type having the property of vyapaka or penetration and come in contact with each other, they naturally penetrate into each other and combining together appear as a single whole. There can be no doubt about it.

This is the gist of this axiom. Thus ends the 20th aphorism.

APHORISM 21.

Hence alone results mutual penetration in both (the things) This is the aphorism.

॥ बो. वृ ॥

पूर्वसूत्रेव्यापकत्वावकाशस्संप्रकीर्तितः । तमप्रकाशयोरस्मिन्नन्योन्यव्याप्तिरुच्यते ॥१॥
एतत्प्रबोधकपदान्यस्मिन्षण्निर्णितानिहि । तत्रादिमपदात्तत्कारणंसम्यक्प्रदर्शितम् ॥२॥
तथैवावधारणार्थोद्वितीयपदतस्स्मृतः । पश्चात्तृतीयपदतःक्रियार्थस्सन्निदर्शितः ॥३॥
चतुर्थपदतःप्रोक्तमन्योन्यत्वंतयोःक्रमात् । व्याप्तिस्तुपंचमपदात्तयोस्सम्यक्प्रदर्शितम् ॥४॥
तथैवषष्ठमपदाद्व्यताप्तिस्थानंनिरूपितम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥६॥

॥ सामान्यार्थः ॥

व्यापकत्वावकाशत्वंपूर्वसूत्रेयतस्स्मृतम् । अतएवतयोस्स्वस्वसान्निध्यादेवकेवलम् ॥६॥
क्रमात्प्रकाशेतमसः तथैवतमसिद्युतेः । परस्परंव्याप्तिरभूत्स्वभावादेवकेवलम् ॥७॥

THE COMMENTARY.

Having established the possibility of mutual penetration of like and unlike things (of Niramsa kind) in the previous aphorism, the manner of their Vyapti or actual penetration resulting in an aggregate of the two, will be dealt with in this aphorism.

This aphorism is composed of six words dealing with the said penetration. The first word expresses the cause for the penetration of light and darkness ; the second word emphasises that that alone is the cause of the effect viz., penetration of the things ; the third word is the verb ; the fourth word denotes that the action is mutual and reciprocal ; the fifth word 'Vyapti' ie., permeation or penetration is the subject of the sentence; the sixth word names the like and unlike things in the case of which this theory holds good. This is the meaning of the words of the aphorism.

THE PURPORT OF THE APHORISM.

The very fact expounded in the previous aphorism that darkness and light allow themselves to permeate mutually, presupposes that their mere coming into contact with each other results in their mutual permeation and formation an aggregate thereof.

On this assertion one may raise an objection as follows.

Well sir, there is some possibility for mutual penetration and

ननुतेजस्तिमिरयोर्विरुद्धधर्मिणोःक्रमात् । कथंनुघटतेव्याप्तिर्विरुद्धत्वात्परस्परम् ॥८॥
अतोव्याप्तिरसिद्धास्यात्तस्माच्छास्त्रंनिरर्थकम् । शास्त्रदृष्ट्याव्याप्तिरुक्तातस्मात्तत्सिद्ध-
मेवहि ॥९॥

श्रुतिप्रमाणात्सार्थिक्यमेतच्छास्त्रस्यविद्यते । तथाहिव्याप्तिः क्वदृष्टंशास्त्रेविरुद्धधर्मिणोः ॥१०॥
इतिचेदुच्यतेशास्त्रप्रमाणंमुनिसम्मतम् । शक्तितंत्रेव्याप्तिनिर्णयाधिकारेविशेषतः ॥११॥
अगस्त्यमुनिनाव्याप्तिलक्षणंसन्निरूपितम् । तत्संगृह्ययथाशास्त्रंकिंचिदत्रनिरूप्यते ॥१२॥

combination of like things; but in the case of unlike things such as light and darkness mentioned in your theory, the same effect is impossible. Further your statement is opposed to the 212th axiom, which establishes that no combination of unlike things is possible. So your statement is contradictory both to common sense and scientific truths. Hence your statement and your shastra containing such false theories are both erroneous, useless and harmful.

The author of the above theory answers the objection, thus.

"Well O erudite opponent, your objection is refuted by reply that penetration and combination of things in question is certainly in consonance with scientific shastras; but the pity of it is only your ignorance of shastras and your untrained common sense.

"As to the shastra you are audacious enough to condemn as false, and so on, note that it is based on the Vedic truths and so is beyond any doubts or Cavil. Your objection has thus been proved groundless."

The opponent again questions the author thus,—

"Well sir, you say that your statement is in accordance with Scientific shastras. If so, can you quote the shastra in support of your statement?"

In answer to this interrogation the expounder of the shastras in question, says "Well, sir, I shall give out briefly the facts

|| उक्तंहिशक्तितंत्रे ||

सृष्ट्यांक्रमात्सजातीयविजातीयप्रभेदतः । द्विविधंहिभवेद्वस्तुतयोर्निरंशवस्तुषु ||१३||
क्रमाद्युतिःप्रकाशस्यतमसस्तमएवच । गगनंचांतरिक्षस्यसजातीयाइतीरिताः ||१४||
आकाशस्यद्युतिस्तद्वत्प्रकाशस्यतमःक्रमात् । अंधकारस्यांतरिक्षंविजातीयाइतीरिताः ||१५||
एतेषांरूपभेदोपिगुणभेदोनविद्यते । गुणस्तेषांव्यापकत्वशक्तिरित्यभिधीयते ||१६||
अन्योन्यव्यापकत्वंयत्तयोर्व्याप्तिरितीर्यते । तद्व्याप्तिर्द्विविधाप्रोक्तासंयोगैक्यप्रभेदतः ||१७||
वस्तुद्वयसमायोगमात्राद्यन्मेळनंभवेत् । तत्संयोगव्याप्तिरितिप्रवदन्तिमनीषिणः ||१८||
रूपतश्शक्तितश्चैवयेषांसंमेळनंभवेत् । तदैक्यव्याप्तिरित्याहुर्वस्तुनांशास्त्रवित्तमाः ||१९||

expressed in a chapter known as Vyapti Nirnayadhikara of Shakti Tantra by Agastya, which please note carefully.

"All matter in creation is of two kinds, Sajateeya or like things and Vijateeya or unlike things. Among Niramsa kind of things light, darkness and akasa have nothing like to them except themselves. In other words light is like to light itself, darkness to darkness itself and so on. Sajateeya Vastu or like things are those which have similar appearance and properties. Again Akasa is unlike to light, light, to darkness and darkness, to light. That is to say they are dissimilar in appearance but similar in properties. The things of one kind differ from those of the other kind only in appearance, but the things of both the kinds have common Guna or properties. By Guna (property) is here meant the power of these things to permeate mutually and combine together. So when two such things combine together forming an aggregate thereof, it is to be understood that the combination is due to the permeating power of these things. Thus the combination of two things results only by the commingling of the permeating power of one thing with that of the other. It is this combination that is known as 'Vyapti' in this shastra.

"This Vyapti or penetration is again of two kinds viz., Samyoga Vyapti and Aikya Vyapti. The combination which results when two things of opposite properties meet together is said to

एतद्व्याप्तिर्भवेत्सम्यक्सजातीयेषुवस्तुषु । रूपतोगुणतश्चैवस्वभावत्वाद्विशेषतः ॥२०॥
तथैवरूपभेदत्वाद्गुणैकत्वाच्चकेवलम् । मंयोगव्याप्तिस्सर्वत्रविजातीयेषुवस्तुषु ॥२१॥
भवत्येवस्वभावेनवस्तुसंयोगमात्रतः ॥ इति ॥

तस्माद्विरुद्धधर्मिणोस्तेजस्तिमिरयोःक्रमात् । संयोगव्याप्तिमेवात्रशास्त्रदृष्ट्यानिरूपितम् ॥२२॥
असिद्धोवाअनर्थोवाशास्त्रानुक्तत्वकारणात् । त्वयोक्तंदूरतोपास्तंव्याप्तिस्स्वाभावकीभवेत ॥२३॥
एकविंशातिसूत्रार्थमित्थमुक्तंसमासतः । विशेषार्थोस्यसूत्रस्यवक्तुंनैवहिविद्यते ॥२४॥

be samyoga vyapti. This penetration is so-called because in it the appearance of neither of the things entering into combination is lost, but the appearance of both the things is present and unmolested in the aggregate formed. Again the combination of things of like appearance and properties, which results naturally when they come in contact with each other, is said to be 'Aikya Vyapti'. This combination is so called because in it the things entering into combination have no difference either in their appearance or properties and form a like aggregate as in the case of mixture of two quantities of water together. That is to say 'Aikya Vyapti' results when two things of similar appearance and properties meet together and "Samyoga Vyapti" when two things different in properties but similar in appearance join together.

"Well, my dear opponent, this is what Shakti Tantra expounds in connection with 'Vyapti', or penetration and combination of things. Coming to the point in dispute, though light and darkness are different in appearance, yet their commixture does result in Samyoga Vyapti or mutual penetration and combination, forming a common aggregate thereby.

"In this way, my theory viz., 'When light and darkness come in contact with each other, they permeate into each other mutually and form a common aggregate' has been established scientifically. Your objection therefore falls to the ground. And the shastra expounding this theory is authentic, enlightening and philanthrophic."

This is the purport of the 21st aphorism which needs no detailed explanation.

॥ सूत्रम् २२ ॥

# ॥ आपोतएव ॥

॥ बो. वृ. ॥

तमप्रकाशयोस्संयोगव्याप्तिः पूर्वसूत्रतः । उक्तमस्मिन्तेनविद्युदापोत्पत्तिर्निरूप्यते ॥१॥
उक्तमापोत्पत्तिप्रबोधकमस्मिन्पदद्वयम् । तत्रादिमपदाद्वैद्युदापोत्पत्तिर्निरूपिता ॥२॥
द्वितीयपदतस्तत्कारणंसम्यङ्निरूपितम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥३॥

॥ सामान्यार्थः ॥

अब्रूपंद्विविधंप्रोक्तंविद्युद्भूतप्रभेदतः । तयोरादौविद्युदापोत्पत्तिक्रमोनिरूप्यते ॥४॥
तेजस्तिमिरयोस्संयोगव्याप्त्यात्यन्तवेगतः । क्रमात्तद्गुणशक्त्योस्संघर्षणोभूत्परस्परम् ॥५॥

APHORISM 22.

Hence alone the evolution of water. This is the aphorism.

THE COMMENTARY.

The Mutual penetration (Samanya vyapti) taking place between darkness and light when they come into contact with each other has been explained in the previous aphorism. In this aphorism how, by that penetration, water in the form of electricity evolved will be explained.

This aphorism is composed of two parts dealing with the process of emanation of this water in the form of electricity. The evolution of this water is expressed by the first part and the cause for that evolution, by the second. Having thus explained the significance of the words in the aphorism now its general sense will be given.

THE GENERAL SENSE.

Shastras speak of a two-fold condition of water viz., that of Vidyut Jala or water in the form of electricity and Bhuta or ordinary water formed by the combination of the requisite elements. Of these the process of evolution of the former will be described first, thus:

अतएवसृष्टिबीजंज्योतिरूपंमहत्तरम् । वैद्युतोदकमुद्भूतमव्यक्तावरणोपरि ॥६॥
यदेतस्मादभूत्सृष्ट्यांसृष्टिबीजविभागतः । तद्भूतोदकमित्याहुर्ज्ञानिनस्तत्वदर्शिनः ॥७॥
वैद्युतोदकमेवास्मिन्सूत्रेसम्यक्प्रकीर्तितम् । एतेनैवजगत्सृष्टिरितिशास्त्रविनिर्णयः ॥८॥
आपोवाइदमग्रेसलिलमासन्निति श्रुतिः । आपएवससर्जादावित्यादिस्मृतयस्तथा ॥९॥
प्राहुस्सूत्रोक्तवैद्युतोदकमेवविशेषतः । एतदेवप्रकाशोदकमितिप्राहुरास्तिकाः ॥१०॥

॥ जलज्योति विलासेपि ॥

अप्स्वरूपंप्रवक्षामिपूर्वाचार्यैर्यथेरितम् । अव्यक्तावरणान्तस्थचिन्मयस्यांगकंपनात् ॥११॥
सृष्ट्यादौयदभूदापस्तज्ज्योतीरसउच्यते । वैद्युतोदकमित्याहुस्तदेवज्ञानवित्तमाः ॥१२॥

Owing to the mutual penetration of light and darkness, as aforesaid, their Guna Shaktis or the powers of their fundamental characteristics are subjected to a rapid friction. By this friction water in the form of electricity which is the germ of creation and which is resplendent and extensive, evolved on the surface of Avyakta halo. This kind of water is also known as "Prakasa Udaka" or water in the form of light or brilliance. On the other hand that water which came into existence by the combination of the component parts of Sisrukshata Shakti of Atma which is the primordial seed of creation and which evolved out of water in the form of electricity is styled by the learned as Bhuta water. It is the water in the form of electricity that is mentioned in this aphorism. And shastras declare that creation of the universe takes place from out of this kind of water only. The Sruti in its passages such as "Prior to creation water in the form of electricity came to existence" as well as Manu and other smritis in their passages such as "Prior to creation the Lord of creation called into existence water in the form of electricity" speak of this water in the form of electricity referred to in this aphorism.

This point is dealt with in a work known as 'Jala jyoti Vilasa' also wherein the author promises that he describes the origin and state of water in accordance with the ancient exponents of science. It is this:

तस्मिन्नव्यक्तपुरुषस्सृष्ट्यर्थंजगतःक्रमात् । स्वसंकल्पप्रकाशैककिरणांन्तर्गतंततः ॥१३॥
स्वरूपविवृतहेतुंबीजशक्तिमवासृजन् । पश्चात्तदापोण्डमभूद्धेमरूपंमहत्तरम् ॥१४॥
तत्रत्यविवृतशक्त्यंशस्वरूपंमहत्तरम् । अभजत्तत्सृष्टिबीजमण्डाकारंतथैवहि ॥१५॥
यथासंकल्पितंपूर्वंतथापश्चान्महेश्वरः । स्वबीजमष्टधाकृत्वाग्न्यादवन्तंयथाक्रमम् ॥१६॥
तत्पिण्डात्क्रमतोग्न्यादीन्समाहर्तुंस्वतेजसा । मुखाद्याशिश्नपर्यन्तमष्टस्थानान्यथा-
क्रमम् ॥१७॥
तत्पिण्डेकल्पयामासपृथक्पृथक्प्रभेदतः । पश्चात्तेषुमुखस्थानाद्वागधिष्ठानरूपकम् ॥१८॥
अग्निमाकर्षयामाससृष्ट्यर्थंजगदीश्वरः । तथैवनासिकास्थानात्प्राणाधिष्ठानरूपकम् ॥१९॥

That water which came to existence prior to creation as a result of the shaking of the body of Avyakta Brahma who is in the Avyakta halo and who is in the form of radiance is known as 'Jyotee Rasa'. And this the learned call 'Vidyut Jala' or the water in the form of electricity. With this water thereupon the Avyakta Brahma, for the propagation of the Universe mixed the power of a ray of his Srushti Samkalpa or Cosmic Ideation which is delineated by the Sruti as 'Let me be Many'', which is in the form of a seed or germ of creation of the universe and which has the property of enlarging itself into the form of the Universe. By this the said water got the shape of an enormous and resplendent egg (Anda). The germ of creation which is in the form of a portion of Vivruta shakti, which is extensive and which was mixed with that water, in its turn, assumed the shape of a human body (Pinda). In accordance with the Cosmic Ideation already volitioned, Maheswara, then, divided his Beeja Shakti or creative germ into eight parts, form Agni to Udaka i.e., from fire to water. Similarly he designed in the said body eight parts, from the mouth to the genitive orgah, with a view to bring forth, by means of his glory fire etc., from those parts in order. For the purpose of propagating the Universe he then brought into existence:—

(1) Fire which is the support (Adhishtana) of speech from one part viz., the mouth of that body ;

वायुमाकर्षयामासनेत्रस्थानात्ततःपरम् । सूर्यमाकर्षयामासनेत्राधिष्ठानरूपकम् ॥२०॥
तथैवपश्चात्तत्पिण्डकर्णस्थानाद्यथाक्रमम् । श्रोत्राधिष्ठानरूपदिशास्सर्वान्समाहरत ॥२१॥
पश्चात्तथैवत्वक्स्थानाल्लोमाधिष्ठानरूपकान् । ओषधीनाहरन्नानाविधान्सोमप्रपोष-
कान् ॥२२॥
तथैवहृदयस्थानात्स्वांताधिष्ठानरूपकम् । समुद्धरच्चन्द्रमसंसुधामयमतःपरम् ॥२३॥
नाभिस्थानादपानाधिष्ठानरूपंतथैवहि । समाहरत्क्रमान्मृत्युंसर्वलोकविनाशकम् ॥२४॥
शिश्नस्थानात्तथैवाथरेतोधिष्ठानरूपकम् । आपस्समाहरद्द्रवान्तशक्तिरूपंद्रवात्मकम् ॥२५॥
एतदेवहिशास्त्रेषुभूतोदकमितीर्यते । जगत्सृष्ट्यर्थमेवंक्रमेणसाक्षान्महेश्वरः ॥२६॥
विभाजितस्ववीर्यांशानग्न्याद्यवन्तरूपकान् । तत्पिण्डस्याष्टस्थानेभ्यस्समुद्धर-
द्यथाक्रमम् ॥२७॥

(2) Air which is the support of life (Prana), from the organ known as the nose of that body;

(3) The sun who is the support of the faculty of sight, from, the organ of the eye of that body;

(4) All the directions which are the support of the faculty of hearing, from the place of the ear of that body;

(5) The entire vegetable kingdom which is the support of hairs and which is nourished by the moon, from the organ of skin of that body;

(6) Chandra, the moon who is the support of Antahkarana and who is in the form of nectar, from the organ of heart of that body;

(7) Mrutyu or death, the destroyer of the Universe which is the support of Apana, from the member, known as Nabhi or the navel;

(8) Lastly, water which is the support of Retus (seminal fluid) and which is in the form of a liquid and Tama Shakti from the part known as the genitive organ of that body.

It should be noted here that it is this water that is known in Shastras as Bhuta-water.

पूर्वमव्यक्तसृष्ट्यर्थमव्यक्तावरणोपरि । यदापःप्रादुरासीत्तद्वैद्युदापइतीर्यते ॥२८॥
वैद्युतोदकमाहृत्यभगवान्जगदीश्वरः । चन्द्रमाद्यष्टस्थानेषुखेविभज्यन्ययोजयत् ॥२९॥
पश्चाद्विभज्याष्टधाभूतोदकंचतथैवहि । कूर्माद्यावातस्कन्धान्तमष्टस्थानेषुशंकरः ॥३०॥
भूगोळेस्थापयामासजगत्सृष्ट्यर्थमंजसा । चन्द्रमाद्यष्टस्थानीयशक्तिभिर्वैद्युतंजलम् ॥३१॥
पश्चात्संक्षोभितंतेननानात्वमभजत्क्रमात् । एवमेवहिभूगोळेभूतोदकमपिक्रमात् ॥३२॥
कूर्मादिशक्तिसंक्षोभादनेकत्वमवापहि । अनयोर्वैद्युतोदकंप्रकाशइतिशास्त्रतः ॥३३॥
भूतोदकंतमइतिप्रवदन्तिमनीषिणः । तेजःपुरुषइतिचसृष्टिबीजमितिक्रमात् ॥३४॥
तमःप्रकृतिरितिचबीजगर्भेतिशास्त्रतः । प्रवदन्तिविशेषेणज्ञानिनस्तत्वदर्शिनः ॥३५॥

In this way Parameswara caused the eight parts of his creative energy, to manifest themselves in order from out of the eight parts of the said embryo.

Then again that water which prior to creation appeared on the surface of the Avyakta halo, for the sake of Avyakta creation, is known as Vidyut Jala or water in the form of electricity. The Lord of the universe then divided the water into eight parts and located them in the eight places such as the moon in the sky. In the same way the Bhuta water was also divided into eight parts and located, for the sake of creation of the Universe, in the eight places beginning with Koorma pitha and ending with Vatha Skandha of the terrestrial globe. In due course of time the water in the form of electricity present in each of the eight places of the sky, was agitated by the powers of the respective places of their abode and so it assumed various forms, in order. Similarly the Bhuta water existing in the eight places of the terrestrial globe was also excited by the powers of the respective places wherein it was located, underwent several changes and manifested in different forms. Of these two kinds, the water in the form of electricity is known, in Shastras, as Light and the Bhuta water, as darkness. The most enlightened seers and seekers of truth termed light as Purusha or man or the seed of creation and darkness, as Prakriti, Beeja garbha or embryo.

अनयोःप्रकृतिपुरुषरूपयोर्ध्वान्ततेजसोः । संयोगतस्स्वभावेनभागसंख्यानुसारतः ॥३६॥
अव्यक्तस्सृष्टिर्व्यक्तास्यादेतत्सृष्टिरितीर्यते । एतदेवात्मविवृतस्वरूपमितिचक्रमात् ॥३७॥
इत्यादि ॥

॥ अप्तत्वप्रकाशिकायामपि ॥

अव्यक्तावरणान्तस्थनारायणाङ्गकंपनात् । तत्रत्यतेजस्तिमिरशक्त्योस्संघर्षणस्स्वतः ॥३८॥
अभूत्परस्परंपश्चात्तेनात्यन्तोष्णमुद्भभौ । तदुष्णवेगात्संजातंवैद्युतोदकमद्भुतम् ॥३९॥
इत्यादि ॥

अतएवेत्यत्रसूत्रेएतत्कारणमीरितम् । वैद्युतोदकमेवापइत्यत्रप्रकटीकृतम् ॥४०॥

By the natural combination of the component parts of darkness and light which are Prakriti and Purusha, the unmanifest (Avyakta) creation became manifest. This is said to be creation of tho Universe. This creation of the Universe is also known as the extended state of the form of Paramatma.

Aptatwa Prakasika, another Scientific work deals with the above points as follows.

"On account of the shaking of the body of Sri Narayana, the Unmanifest Being existing in the Avyakta halo, the light and darkness present in that halo were naturally subjected to mutual friction, whereby extreme heat was produced. By the intensity of this heat, water which is wonderful and is in the form of electricity came into existence.

In conclusion it is to be noted here, that the aphorism by its second part 'Athaeva' or 'Hence alone' points out the above cause for the evolution of the water in the form of electricity, defined by the first part, 'Apah'.

॥ सूत्रम् २३ ॥

## ॥ विद्युत्प्रकाशयोः परस्परापकर्षणमेकस्व-रूपत्वादुभयत्रैकोननवतितमन्यायेन ॥

॥ बो. वृ ॥

पूर्वसूत्रेवैद्युतोदकोत्पत्तिस्सन्निरूपिता । अस्मिन्नव्यक्तपुरुषवैद्युतोदकयोःक्रमात् ॥१॥

स्वरूपभूतविद्युत्प्रकाशयोरुभयोरपि । परस्पराकर्षणत्वंप्रोच्यतेन्यायमानतः ॥२॥

एतत्प्रबोधकपदान्यस्मिन्पंचयथाक्रमम् । निर्णितानियथाशास्त्रंपदच्छेदनतस्स्फुटम् ॥३॥

APHORISM 23.

Since the Imperceptible Being (Avyakta Purusha) and the water in the form of electricity have both a similar appearance, th se two lights of electricity attract each other in accordance with the 89th axiom.

THE COMMENTARY.

The process of evolution of water in the forn of electricity has been dealt with in the previous aphorism. The natural attraction taking place according to the 39th axion between the two electric lights which are the common appearance or form of the Imperceptible Being (Avyakta Purusha) and the water in the form of electricity will be explained in this aphorism.

This aphorism consists of five words dealing with the said attraction. The first word names the electric brilliance which is the appearance of the Imperceptible Being and the water in the form of electricity. The second word states the mutual attraction taking place between them. The third word expresses that these two have the same appearance viz., electric brilliance. The fourth word mentions the Imperceptible Being and the water in the

तत्रादिमपदाद्विद्युत्प्रकाशौसन्निदर्शितौ । अन्योन्याकर्षणंतद्वद्दितीयपदतस्तयोः ॥४॥

स्वरूपैकत्वमुक्तंस्यात्तृतीयपदतस्तथा । विद्युज्जलाव्यक्तपुरुषौतुरीयपदात्स्मृतौ ॥५॥

तथैवपंचमपदात्स्वतस्सिद्धोनिदर्शितः । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥६॥

॥ सामान्यार्थः ॥

अव्यक्तावरणान्तस्थपुरुषस्यतथैवहि । तदावरणबाह्यस्थविद्युज्जलस्यचक्रमात् ॥७॥

उभयोर्विद्युत्प्रकाशस्वरूपत्वंस्वभावतः । एकत्वादेवविद्युत्प्रकाशयोस्तत्स्वरूपतः ॥८॥

एकोननवतितमन्यायमानांनुसारतः । आकर्षणमभूत्सम्यगुभयत्रपरस्परम् ॥९॥

॥ तदुक्तंसृष्टिविलासे ॥

अव्यक्तपुरुषविद्युद्वारिणोरुभयोःक्रमात् । विद्युत्प्रकाशाकारत्वमेकमेवेतिनिर्णितम् ॥१०॥
इत्यादि ॥

सूत्रेयदेकोननवतितमन्यायईरितः । तद्विविच्यात्रविधिवत्संग्रहेणनिरूप्यते ॥११॥

form of electricity. The fifth word refers to the 89th axiom, in support of the statement made in the aphorism. Having thus interpreted the significance of the words of the aphorism, we shall now examine its general sense.

## The General Sense.

According to the 89th axiom the two electric lights viz., that of the Imperceptible Being within the Avyakta halo and the water in the form of electricity without it, attract each other on account of the sameness of their appearance.

Srusti Vilasa also expounds the fact that the Imperceptible Being and water in the form of electricity are both identical in their form and appearance viz., electric brilliance.
Having thus given the general sense of the aphorism we shall now quote the 89th axiom and explain it.

॥ स्वतस्सिद्धन्यायसूत्रम् ८९ ॥

## ॥ भिन्नवस्तुत्वेपिस्वरूपशक्त्यैक्यत्वेतयोः परस्पराकर्षणंसहजम् ॥

॥ विश्वंभरवृत्तिः ॥

योत्राकोत्रा भवेद्वस्तुभिन्नजातीयवस्तुनोः । स्वरूपशक्त्योरैक्यत्वेसत्यन्योन्यापकर्षणम् ॥१२॥
सहजंस्यात्तयोस्सम्यगितिन्यायविनिर्णयः । इतित्रयोविंशतिकस्सूत्रार्थस्संग्रहात्स्मृतः ॥१३॥

---

॥ सूत्रम् २४ ॥

## ॥ तयोः प्रतिफलनमत स्तास्मिन्दर्पणादित्य किरणवत् ॥

THE 89TH AXIOM.

When the powers of two things though belonging to different kinds but having similar inherent and characteristic powers come together, the powers of these two things naturally attract each other. This is the axiom.

THE COMMENTARY.

It is natural that when the Swaroopa Shaktis or the characteristic powers of two things though of dissimilar type, come in contact with each other, they should attract mutually, provided their inherent powers are such as will make a uniform aggregate when they combine together. This fact has been set down as the 89th axiom.

Thus ends the 23rd aphorism.

APHORISM 24.

Hence the Avyakta Being and the water in the form of electricity reflected in the said darkness of Avyakta, just as the solar rays in a mirror. This is the aphorism.

॥ बो. वृ. ॥

पूर्वसूत्रेव्यक्तपुरुषवैद्युतोदकयोः क्रमात् । परस्परास्वस्वरूपशक्त्याकर्षणमीरितम् ॥
तथैवास्मिन्तयोस्सम्यगव्यक्ततमसिक्रमात् । कीर्त्यतेप्रतिफलनंपरस्परंस्वभावतः ॥२॥
प्रतिफलनबोधकपदान्यस्मिन्यथाक्रमम् । पदच्छेदनतःपंचनिर्णितानियथाविधि ॥३॥
तत्रादिमपदाद्वारिपुरुषौसन्निरूपितौ । तद्वत्तयोः प्रतिफलनत्वमुक्तंद्वितीयतः ॥४॥
तृतीयपदतस्तत्कारणत्वंसन्निरूपितम् । चतुर्थपदतोव्यक्ततमोरूपंनिदर्शितम् ॥५॥
तथैवपंचमपदादृष्टान्तस्सन्निदर्शितः । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥६॥

॥ सामान्यार्थः ॥

यथैवप्रतिफलनमादित्यकिरणस्यहि । भवेत्कृष्णमुखादर्शेतथैवात्यन्तवेगतः ॥७॥
पूर्वोक्ताव्यक्तपुरुषवैद्युतोदकयोस्तयोः । अतएवप्रतिफलनंतदव्यक्ततमस्यभूत् ॥८॥

### The Commentary.

The previous aphorism has explained how mutual attraction between the powers of Avyakta or Unmanifest Being and water in the form of electricity takes place. This aphorism explains how they both naturally reflect in the darkness of Avyakta.

This aphorism is composed of five words dealing with the said reflection. The Avyakta or Unmanifest Being and the water in the form of electricity are named by the first word, the act of reflection of the said . Unmanifest Being and the water in the form of electricity, by the second word, the cause for the reflection by the third word, the darkness of Avyakta halo by the fourth word and the example of the solar rays, by the fifth word.

Having thus interpreted the meaning of the words of the aphorism, we shall now proceed to examine its general sense.

### The General sense of the Aphorism.

Both the Avyakta Being and water in the form of electricity reflect in the darkness of Avyakta, owing to their natural and mutual attraction already explained, just as solar

॥ कृष्णमुखादर्शमुक्तंदर्पणप्रकरणे ॥

कर्बुरपारदमौक्तिककुरटिसैकतद्रौणिकतुंबुरकन्दम् । प्राणक्षारस्फाटिकलवणंनळिकात्वक्सौ-रिकफटिकारम् ॥९॥ टंकणबर्बुरनागकिशोरं मांचुळिकंपीतकंकृणीमूलम् । एतान्वस्तून्शुद्धिंकृत्वासमभागांशान्मूषामध्ये ॥१०॥ निक्षिप्याथशिवामुखकुंडे आच्छाद्येंगालाग्निशिलाद्यैः । वेगात्संगाल्य पंचोत्तरत्रिशतकक्ष्योष्णमानतस्सम्यक् ॥११॥ वैराजिकयंत्रमुखेतद्रसमुद्धृत्य सेचयेत्पश्चात् । एवंकृतेतिमृदुळंयानांगंभारवर्जितंसुदृढम्-॥१२॥ भवतिमनोहरमद्भुतभास्करकिरणापकर्षणंदिव्यम् । अत्यन्तसुन्दरास्यं कृष्णमुखादर्शमतिरुचिरम् ॥१३॥ इत्यादि ॥

rays, in a glass known as "Krishna Mukha" or a glass with a dark surface. This is the general sense of the aphorism.

The composition and the process of preparation of the Krishnamukha glass referred to in the aphorism is describedin a work known as "Darpana Prakarana", thus :—

The list of the ingredients used in the manufacture of Krishnamukha glass.

1. Karbura
2. Mercury
3. Shells
4. Kuruti
5. Sand
6. Draunika
7. Thumbara Kanda
8. Saltpetre
9. Salammoniac
10. Salt extracted from sphatica stone (crystal)
11. The skin of crabs.
12. Saurika
13. Alum
14. Borax
15. Barbura
16. Naga Kishora
17. Manchulika
18. Peetha Kanakrunee Moola.

Equal quantities of the above articles duly purified, should be filled in a crucible and placed in a furnace known as "Shiva Mukha Kunda", filled with charcoal, pieces of quartz etc., and be heated to the extent of 305 kakshyas or degrees. Then the mixture melts. This molten liquid should then be poured on the surface of an apparatus known as Vairajika.

चतुर्विंशतिसूत्रार्थस्संप्रदायानुसारतः । इतिसंकीर्तितंसम्यक्संग्रहेणयथामति ॥१४॥

---

॥ सूत्रम् २५ ॥

# ॥ तस्मात्तदुपर्यनन्तसृष्टिपथरेखाप्रसारणं सर्वत्र ॥

॥ बो. वृ. ॥

पूर्वसूत्रेऽव्यक्तपुरुषवैद्युतोदकयोः क्रमात् । परस्पराशक्त्यपकर्षणमुक्तंयथाविधि ॥१॥

तथैवास्मिन्सृष्टिपथरेखानिर्णयमुच्यते । रेखाप्रबोधकपदान्यस्मिन्चतुः क्रमात् ॥२॥

This properly done, glass will result, known as Krishna Mukha which is very elastic, light, strong, fine, and bright, which is useful in the manufacture of air-ships, which attracts solar rays and which has a beautiful surface. Thus the shastra continues further.

This is the meaning of the 24th aphorism.

---

APHORISM 25.

Hence demarcating lines of creation in countless number were produced on all sides of the Avyakta halo. This is the aphorism.

THE COMMENTARY.

The previous aphorism has explained the natural and mutual cohesion (attraction) existing between the shaktis of the Avya kta Being and the water in the form of electricity. The lines or paths for the Brahmandas to be traced along will be described in this aphorism.

In this aphorism there are four words dealing with the said paths along which Brahmandas coming into existence, are to be located. The first word says that the mutual cohesion and intermixture of the powers of Avyakta Being and the water in

पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि । तत्रादिमपदाच्छक्तिद्वयसंयोगकारणम् ॥३॥
उक्तंद्वितीयपदतोव्यक्तावरणमीरितम् । रेखापथप्रसारणंतृतीयपदतस्स्मृतम् ॥४॥
चतुर्थपदतस्तद्रेखापथस्थानमीरितम् । पदार्थमेवमुक्त्वास्यसंग्रहेणयथाविधि ॥५॥
सामान्यार्थोत्रविधिवत्कीर्त्यतेसंप्रदायतः ॥

॥ सामान्यार्थः ॥

पूर्वोक्तशक्तिद्वयसंयोगकारणतः क्रमात् । अनन्तसृष्टिपथरेखाप्रसारणमद्भुतम् ॥६॥
सर्वत्राभूत्तदव्यक्तावरणोपर्यनेकधा । इतिशास्त्रेषुविद्वद्भिस्तत्रतत्रनिरूपितम् ॥७॥

॥ तदुक्तंब्रह्माण्डसारे ॥

ब्रह्माण्डसृष्टिरेखापंथानश्शास्त्रेषुभूरिशः । अनन्ताइतिविख्यातास्सृष्टितत्त्वविशारदैः ॥८॥
इत्यादि ॥

the form of electricity is the cause of the emanation of the paths along which the Brahmandas are to be located. The second word points out the Avyakta halo.

The third word declares the stretching forth of these paths. The fourth word fixes the place where these lines stretch out.

Having thus given the meaning of the words of the aphorism its general sense will be explained below.

### The General Sense.

As a natural consequence of the inter-mixture of the powers of the Avyakta Being and the water in the form of electricity explained in the previous aphorism, a wonderful cluster of lines was produced on all sides of the Avyakta halo. This fact has been mentioned by the learned in several shastric works.

Brahmanda-sara may here be quoted as one of the above works. It says on the above point as follows :—

"The learned declare in shastras that the paths to fix the situation of Brahmandas are innumerable".

Such is the general sense of this aphorism.

॥ सूत्रम् २६ ॥

# ॥ शक्तयोनव ॥

॥ बो. वृ. ॥

पूर्वसूत्रेसृष्टिरेखाप्रसारणमुदीरितम् । तासामस्मिन्यथाशास्त्रंकीर्त्यन्तेनवशक्तयः ॥१॥
शक्तिप्रबोधकपदद्वयमस्मिन्यथाक्रमम् । पदच्छेदनतस्सम्यङ्निर्णितंस्याद्यथाविधि ॥२॥
तत्रादिमपदाद्रेखाशक्तयस्सन्निदर्शिताः । द्वितीयपदतस्तत्संख्याप्रमाणंनिरूपितम् ॥३॥
एवंपदद्वयार्थोक्तस्संप्रदायानुसारतः । सामान्यार्थोद्यसूत्रस्यसंग्रहेणनिरूप्यते ॥४॥

॥ सामान्यार्थः ॥

ब्रह्माण्डसर्जनपथरेखाणांशक्तयः क्रमात् । घनादिनवइत्युक्ताश्शास्त्रेषुज्ञानवित्तमैः ॥५॥

APHORISM 26.

The Shaktis are nine. This is the aphorism.

THE COMMENTARY.

The previous aphorism explained how the lines along which Brahmandas are located, spread out. This aphorism names the nine shaktis of those lines.

The aphorism is made up of two words dealing with the said powers. The first word names the paths fixing the position of Brahmandas. The second word determines the number of their powers. This is the literal meaning of the aphorism, the general sense of which is as follows.

THE GENERAL SENSE OF THE APHORISM.

Eminent scientists of yore have declared in shastras that the number of powers of the paths locating the position of Brahmandas is nine, the first of which is "Ghana Shakti".

Srushti Vilasa wherein this point is dealt with at length, names these nine powers in order, thus.

| | | | |
|---|---|---|---|
| 1. Ghana | Shakti | 5. Prasarana | Shakti |
| 2. Akarshana | ,, | 6. Vikalpana | ,, |
| 3. Sankochana | ,, | 7. Garbhakrith | ,, |
| 4. Vikasana | ,, | 8. Pushti | ,, |

9. Jyoti Prakasika ,,

॥ तदुक्तंसृष्टिविलासे ॥

धनाकर्षणसंकोचविकासनप्रसारणाः । विकर्षणागर्भकृच्चसृष्टिर्ज्योतिप्रकाशकाः ॥६॥
इत्येतेसृष्टिरेखाणांशक्तयोनवकीर्तिताः । ताश्चेतास्सहजाइतिप्रोक्तास्तत्वविदांवरैः ॥७॥

इत्यादि ॥

॥ सूत्रम् २७ ॥

## ॥ तच्छक्त्यपकर्षणात्ध्वान्तसंमेळनंसर्वत्र ॥

॥ बो. वृ. ॥

पूर्वसूत्रेशक्तिपथरेखाशक्तयईरिताः । तद्रेख[illegible]ध्वांतसंमेळनमस्मिन्प्रचक्षते ॥१॥
तन्मेळनप्रबोधकपदानित्रीण्यथाक्रमम् । अस्मिन्सूत्रेनिर्णितानिपदच्छेदनतस्स्फुटम् ॥२॥

These are, in order, the nine powers of the paths fixing the position of Brahmandas. The learned declare that these powers exist in those paths naturally.

This is the general sense of the 26th aphorism.

### Aphorism 27.

The darkness attracted by the said forces spread throughout and combined with the light of the paths along which Brahmandas are situated. This is the aphorism.

### The Commentary.

The forces of the paths fixing the position of Brahmandas have been dealt with in the previous aphorism. This aphorism explains how the darkness of Avyakta halo spreads throughout and mixes with the light of the said paths.

To explain this pervasion of the darkness and the light four words have been employed in this aphorism. The first word refers to the attraction of the darkness of Avyakta halo by the forces of the paths fixing the locality of Brahmandas. The second word names the act of penetration of the said darkness by the light of those paths. The third word points out the extent to which the darkness spreads.

तत्रादिमपदाद्ध्वान्ताकर्षणंशक्तिभिस्स्मृतम् । द्वितीयपदतोध्वान्तसंमेळनमुदीरितम् ॥३॥
संमेळनस्थानमुक्तंतृतीयपदतस्तथा । पदार्थमेवमुक्त्वास्यसामान्यार्थोद्यकीर्त्यते ॥४॥

॥ सामान्यार्थः ॥

पूर्वोक्ताव्यक्ततमसियारेखास्संप्रसारिताः । विद्युत्प्रकाशरूपास्तास्सृष्टिरेखास्स्वभावतः ॥५॥
तत्सृष्टिरेखाशक्तीनामपकर्षणतस्ततः । तासुरेखासुसर्वत्राव्यक्तस्थतमसःक्रमात् ॥६॥
संमेळनमभूत्सम्यगविनाभावतस्स्वतः । इतिसामान्यार्थमुक्तस्सूत्रस्यास्ययथामति ॥७॥

सूत्रम् २८

## ॥ तच्छक्तिसंयोगाद्रोहिण्याविर्भाव स्तास्मिन्षोडशोत्तरद्विशतन्यायेन ॥

॥ बो. वृ ॥

उक्त्वासंमेळनंपूर्वसूत्रेतमप्रकाशयोः । तस्माच्छक्त्यन्तरोत्पत्तिस्सूत्रेस्मिन्सन्निरूप्यते ॥१॥
तदुत्पत्तिप्रबोधकपदान्यस्मिन्चतुः क्रमात् । पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि ॥२॥

This is the significance of the words in the aphorism, the general sense of which is as follows.

THE GENERAL SENSE.

The paths along which Brahmandas are situated proceed from the darkness of Avyakta halo and are full of electric brilliance. The forces of these paths attract darkness of the Avyakta halo which spreads throughout and combines with the light of the above demarcating lines.

This is the general sense of the 27th aphorism.

APHORISM 28.

By the intermingling of those forces a fresh force, Rohini by name was produced in the Avyakta halo in accordance with the 216th axiom. This is the aphorism.

THE COMMENTARY.

The previous aphorism explained the combination of the forces of the brilliance of the paths directing the situation of Brahmandas and that of the darkness of the Avyakta halo. This

तमप्रकाशंयोश्शक्तिस्तत्रादिमपदात्स्मृता । द्वितीयपदतश्शक्त्यन्तरोत्पत्तिर्निदर्शिता ॥३॥
अव्यक्तावरणंतद्वत्तृतीयपदतस्स्मृतम् । स्वतस्सिद्धन्यायमुक्तंचतुर्थपदतः क्रमात् ॥४॥
षदार्थमेवमुक्त्वास्यसंप्रदायानुसारतः । सामान्यार्थोयविस्विवरसंग्रहेणनिरूप्यते ॥५॥

॥ सामान्यार्थः ॥

षोडशोत्तरद्विशतन्यायमानानुसारतः । तमप्रकाशयोश्शक्तिसंयोगादेवकेवलम् ॥६॥
तस्मिन्नव्यक्तावरणेसृष्ट्याधारामहत्तरा । वैद्युतोदकमध्यस्थशक्तित्रयविभेदिनी ॥७॥
रोहिणीनामकाकाचिच्छक्तिःप्राविरभूत्स्वतः । ब्रह्माण्डधारणीह्येषास्वशक्त्यासर्वतोमुखा ॥८॥

॥ शक्तित्रयमुक्तंसृष्टिविलासे ॥

जलरेतोरसमयाब्रह्माण्डोत्पत्तिहेतुकाः । वैद्युतोदकमध्यस्थशक्तयस्त्रिविधास्स्मृताः ॥९॥
इत्यादि ॥

aphorism aims at explaining how, by this combination, a new force comes into existence.

This aphorism is composed of four words dealing with the emanation of a fresh force. The first word refers to the forces of the splendour of the lines directing the situation of Brahmandas and of the darkness of the Avyakta halo. The second word sets out the manifestation of a fresh force. The third word names the Avyakta halo. The fourth word mentions the 216th axiom. This is what the words of the aphorism import.

The purport of the aphorism:—

As a natural result of the combination of the two forces —one of the splendour of the paths fixing the position of Brahmandas and the other of the darkness of the Avyakta halo— a third force known as Rohini which is the support of the entire creation and which can analyse the three forces contained in the said water in the form of electricity, was produced in the Avyakta halo in accordance with the 216th axiom. This wonderful force by virtue of its all-pervading capacity supports countless Brahmandas in creation.

एवंसामान्यार्थमुक्त्वासूत्रस्यास्ययथाक्रमम् । स्वतस्सिद्धन्यायसूत्रंसंग्रहेणाद्यकीर्त्यते ॥१०॥

---

॥ स्वतस्सिद्धन्यायसूत्रम् २१६ ॥

## ॥शक्तिद्वयसंयोगेशक्त्यंतराविर्भावस्सहजम्॥

॥ विश्वंभरवृत्तिः ॥

सजातीयविजातीयप्रभेदाच्छक्तयोर्द्विधा । शक्तिद्वयसमायोगस्तयोर्यत्रभवेत्क्रमात् ॥११॥
तत्रशक्त्यंतरोत्पत्तिस्सहजंस्यादितीरितम् । इतिस्वतस्सिद्धसूत्रप्रोक्तन्यायविनिर्णयः ॥१२॥
एवमष्टाविंशतिकंसूत्रार्थस्संप्रदायतः । समालोच्ययथाशास्त्रंसामान्येननिरूपितम् ॥१३॥

॥ सूत्रम् २९ ॥

## ॥ तत्संयोगात्घनत्वंतच्छक्तिनाम् ॥

Referring to the water in the form of electricity, Srushti Vilasa says that it is the primordial matter of all creation and that it is made up of the three forces viz., water, Retus or semen and Rasa or spirit of Atma.

THE 216TH AXIOM.

Two forces coming in contact with each other give rise to a third one. This is the axiom.

VISWAMBHARA'S COMMENTARY.

All forces are, by nature, of two kinds viz., like and unlike. Thus wherever a like and an unlike force join together, they naturally give rise to a third force, altogetherd ifferent from the previous two. This natural phenomena has been set down as a self-evident truth.

APHORISM 29.

By its contact those forces got solidified. This is the aphorism..

THE COMMENTARY.

Having explained the origin of the force viz., Rohini in the previous aphorism, the process of solidification of the three

॥ बो. वृ ॥

रोहिण्याविर्भावमुक्त्वापूर्वसूत्रेयथाविधि । वैद्युतोदकशक्तीनामस्मिन्घनत्वमीर्यते ॥१॥
घनप्रबोधकपदान्यस्मिन्त्रीणियथाविधि । पदच्छेदनतस्सम्यङ्निर्णितानियथाक्रमम् ॥२॥
पूर्वोक्तरोहिणीशक्तिस्तत्रादिमपदात्स्मृता । द्वितीयपदतस्तद्वद्घनत्वंसन्निदर्शितम् ॥३॥
तृतीयपदतोविद्युज्जलशक्तयईरिताः । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥४॥

॥ सामान्यार्थः ॥

पूर्वोक्तरोहिणीशक्तिसंयोगेनयथाक्रमम् । त्रिविधानांवैद्युतोदकशक्तीनांस्वभावतः ॥५॥
घनत्वमभवत्सम्यगितिसूत्रार्थनिर्णयः । एवंसामान्यार्थमुक्त्वासूत्रस्यास्ययथामति ॥६॥
अथेदानींसंग्रहेणविशेषार्थोनिरूप्यते ॥

॥ विशेषार्थः ॥

## ॥ घनत्रयस्वरूपमुक्तंब्रह्माण्डसारे ॥

forces of water in the form of electricity will be described in this aphorism.

This aphorism consists of three words dealing with solidification of the above three forces. The first of these words names Rohini Shakti referred to above, the second word states that those forces get solidified and the third word names the three forces of which water in the form of electricity is made up. This is the meaning of the words of the aphorism.

THE GENERAL SENSE.

By the contact of Rohini shakti, the three forces of water in the form of electricity got naturally solidified. This is the general sense of the aphorism.

The technical explanation.

The nature of the three solids is explained in Brahmandasara thus:—

Prior to creation there existed only Paramatma, who is the origin of all light and who is infinite, eternal, unmanifest and free from gunas. For the sake of the creation of the Universe He

आदिदेवोमहादेवःपरमात्मासनातनः । निराकारोनिर्गुणोभूत्सृष्ट्यादावेकएवहि ॥७॥
स्वयमेवपरात्माथसृष्ट्वर्थलीलयाक्रमात् । अव्यक्तरूपमासाद्यतमसाभासयन्स्वतः ॥८॥
अपएवससर्जादौस्वांगाद्घनत्रयात्मकम् । आपोघनस्यात्प्रथमोततोरेतोघनस्स्मृतः ॥९॥
पश्चाद्रसघनइतिप्रोक्तंजलघनत्रयम् । व्यक्ताव्यक्तविभागाभ्यांपिंडब्रह्मांडयोःपुनः ॥१०॥
पृथिवीदेहजीवादिविकारेणयथाक्रमम् । विवृताकारतोह्येतेत्रिघनाएवकेवलम् ॥११॥
प्रपंचाकारतस्सम्यग्भ्राजन्तेसर्वतोमुखाः । सृष्टिबीजमितिप्राज्ञास्तान्येवाहुर्विशेषतः ॥१२॥
इत्यादि ॥

॥ प्रपंचलहर्यामपि ॥

अव्यक्तरूपोभगवान्सृष्ट्यर्थंस्वांगतस्स्वयम् । आपएवससर्जादौघनत्रयात्मकंक्रमात् ॥१३॥
इत्यादि ॥

got the form of Avyakta and joining with darkness, gave birth to water alone, which is in the form of the Ghana Traya or the three solids. The first of these solids is Jalaghana, the second Retoghana and the third Rasaghana. These three solids themselves assuming different forms such as the earth, the body and the soul extend into the form of the entire universe. It is these three solids which assume countless forms that the shastras speak of as the seeds of creation.

A similar account is given in Prapancha Lahari also on this point. It is this.

The Avyakta Being for the purpose of propagating the universe gave rise to water alone originally from out of His own body. This water included ghanatraya.

By ghanatraya the three solids viz, of water, of retus or semen and of Rasa or spirit are meant.

In this connection Manu Smriti also observes as follows—

Prior to creation Parabrahma, who is beyond the perception of the senses, who cannot be known by the ignorant, who is subtler than Akasa, who cannot be seen by the fleshy eye-balls, who is eternal, who is the aggregate and common form of all

॥ मनुस्मृत्यामपि ॥

योसावतीन्द्रियोग्राह्यो सूक्ष्मोव्यक्तस्सनातनः । सर्वभूतमयोचिंत्यस्सएवस्वयमुद्बभौ ॥१४॥
सोभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । आपएवससर्जादौतासुबीजमवासृजत् ॥१५॥

बीजंनाम जलघन, रेतोघन, रसघनस्वरूपमितिज्ञेयम् ॥

॥ सूत्रम् ३० ॥

# ॥ विद्युच्छक्त्यपकर्षणात्तासुघनत्रयव्याप्तिस्सर्वत्र ॥

---

॥ बो. वृ. ॥

वैद्युतोदकशक्तीनां घनत्वंपूर्वसूत्रतः । उक्त्वाघनत्रयव्याप्तिस्तद्रेखास्वत्रकीर्त्यते ॥१॥
तद्व्याप्तिबोधकपदान्यस्मिन्चतुःक्रमात् । पदच्छेदनतस्सम्यङ्निर्णितानियथाक्रमम् ॥२॥

created phenomena and whose form cannot be conceived, existed alone. With a view to propagate different kinds of human beings He then created water itself as the nucleus of all the objective universe, from out of His own body. Thereupon he dissolved in it His own semen which is in the form of the three solids viz., of Jala, Retus and of Rasa which are the origin of the earth, body and Jeeva or the spirit of Atma respectively.

This is the technical explanation of the 29th aphorism.

APHORISM 30.

By the attraction of electricity, the forces of the said three solids pervaded them entirely. This is the aphorism.

THE COMMENTARY.

The previous aphorism dealt with the process of solidification of the forces of the water in the form of electricity. This aphorism explains how the forces of the three solids named above pervade throughout the lines directing the situation of the Brahmandas.

तत्रादिमपदात्प्रोक्तं विद्युच्छक्त्यपकर्षणम् । द्वितीयपदतस्सृष्टिरेखास्सम्यक्प्रदर्शिताः ॥३॥
घनत्रयव्याप्तिरुक्तातृतीयपदतस्तथा । चतुर्थपदतोव्याप्तिस्थानंसम्यक्प्रदर्शितम् ॥४॥
पदार्थमेवमुक्त्वास्यसूत्रस्यविधिवत्क्रमात् । संग्रहेणयथाशास्त्रंसामान्यार्थोधुनोच्यते ॥५॥

॥ सामान्यार्थः ॥

पूर्वोक्तसृष्टिरेखाणांविद्युच्छक्त्यपकर्षणात् । अन्तर्बहिश्चसर्वत्रतद्रेखासुयथाक्रमम् ॥६॥
जलशक्तित्रयघनव्याप्तिरन्योन्यतस्स्वतः । अभूदितियथाशास्त्रसामान्यार्थोनिरूपितः ॥७॥

॥ सूत्रम् ३१ ॥

## ॥ शक्तित्रयसंयोगाद्ब्रह्माण्डाविर्भावस्तासु-जलबुद्बुदवत्षोडशोत्तरद्विशतन्यायेन ॥

This aphorism consists of four words dealing with the process of pervasion of the three solids. The first of these words points out the attraction of electricity of the lines directing the situation of the Brahmandas ; the second word names the paths fixing the position of the Brahmandas ; the third word mentions the action viz., pervasion that takes place in those lines; and the fourth word points out the place where the pervasion takes place. This is the meaning of the words in the aphorism.

### The General Sense.

Being attracted by the electricity of the paths directing the situation of the Brahmandas, the forces of the Ghana Traya or the three solids, (of Jala, Rasa and Retus) present in water in the form of electricity, naturally spread and pervaded in all those paths throughout. This is the general sense of the aphorism.

### Aphorism 31.

By the combination of the three forces, the Brahmandas evolved in those paths directing the situation of the Brahmandas, just like bubbles in water in accordance with the 216th axiom. This is the aphorism.

॥ बो. वृ. ॥

पूर्वसूत्रेघनत्रयशक्तित्र्याप्तिर्निरूपिता । अस्मिन्तत्सृष्टिरेखासुब्रह्माण्डोत्पत्तिरुच्यते ॥१॥
ब्रह्मांडोत्पत्तिबोधकपदान्यस्मिन्यथाक्रमम् । पदच्छेदनतःपंचनिर्णितानियथाविधि ॥२॥
तत्रादिमपदाच्छक्तित्रयसंमेळनंस्मृतम् । ब्रह्माण्डाविर्भावमुक्तंद्वितीयपदतस्तथा ॥३॥
तृतीयपदतस्सृष्टिरेखास्सम्यक्प्रदर्शिताः । दृष्टान्तमण्डोत्पत्तिविधौचतुर्थपदतस्स्मृतः ॥४॥
तथैवपंचमपदात्स्वतस्सिद्धोनिदर्शितः । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥५॥

॥ सामान्यार्थः ॥

सृष्टिरेखासमुत्पन्नविद्युच्छक्तिस्तथैवच । अव्यक्तस्थतमोशक्तिश्शक्तिर्घनत्रयस्यच ॥६॥
इमास्त्रिशक्तयस्सम्यग्ब्रह्मांडोत्पत्तिहेतुकाः । पूर्वोक्तसृष्टिरेखासुआसांसंमेळनात्स्वयम् ॥७॥
षोडशोत्तरद्विशतन्यायमानानुसारतः । ब्रह्मांडोत्पत्तिरभवज्जलेबुद्बुदवत्क्रमात् ॥८॥
इत्युक्तमेतत्सूत्रस्यसामान्यार्थोयथाक्रमम् । समालोच्ययथाशास्त्रंसंग्रहेणयथामति ॥९॥

### The Commentary.

Pervasion of the forces of the three solids was dealt with in the previous aphorism while the manifestation of the Brahmandas is explained in this aphorism.

In this aphorism there are five words dealing with the process of emanation of the Brahmandas. The first word refers to the three forces viz: (1) the electricity of the paths directing the situation of the Brahmandas, (2) the darkness of the Avyakta halo and (3) the Ghana Traya or the three solids. The second word means the emanation of the Brahmandas coming into existence, as the result of the combination of the above three powers. The third word names the paths directing the situation of the Brahmandas. The fourth word offers a parallel to this Phenomena. The fifth word refers to the 216th axiom. This is the meaning of the words in the aphorism.

### The General Sense.

By the combination of the three powers viz: (1) the power emanating from the paths directing the situation of the Brahmandas, (2) the power of darkness of the Avyakta halo and (3) the

॥ सूत्रम् ३२ ॥

## ॥ तद्घनशक्त्यांतदितरशक्त्यंशसंमेलना-त्तस्मिन्प्रसारितरेखानुसारेण ॥

॥ बो. वृ. ॥

ब्रह्मांडाविर्भावमुक्त्वापूर्वसूत्रेयथाक्रमम् । तदाविर्भावएवास्मिन्विशदीकृत्यकीर्त्यते ॥१॥
पदानिपंचसूत्रेस्मिन्निर्णितानियथाविधि । तत्रादिमपदादुक्तब्रह्माण्डस्सन्निदर्शितः ॥२॥
तथाविद्युज्जलघनशक्तिरुक्ताद्वितीयतः । तृतीयपदतोध्वांतविद्युच्छक्त्यंशाईरितः ॥३॥
चतुर्थपदतोवैद्युतोदकंसन्निदर्शितम् । तथैवपंचमपदात्सृष्टिरेखाःप्रदर्शिताः ॥४॥
एवंक्रमेणसूत्रस्यपदार्थस्सन्निरूपितः । सामान्यार्थोद्यविधिवत्संग्रहेणप्रचक्षते ॥५॥

power of Ghana Traya of water in the form of electricity. Brahmandas appeared in the said paths, just as bubbles in water, according to the 216th aphorism which has been quoted and explained already. This is the general sense of the aphorism.

APHORISM 32.

By the fusion of other forces with Ghana Shakti, the Brahmandas emanated in the said paths (directing the situation of the Brahmandas) proceeding from water in the form of electricity. This is the aphorism.

THE COMMENTARY.

The process of evolution of Brahmandas dealt with in the previous aphorism is further explained in this aphorism.

There are five words in this aphorism. Of these the first word refers to the Brahmandas mentioned in the previous aphorism. The second word names the jala ghana shakti of water in the form of electricity. The third word points out the component parts of darkness and light of the paths directing the situation of the Brahmandas. The fourth word names water in the form of electricity. The fifth word indicates the lines accommodating the Brahmandas. This is the meaning of the words in the aphorism.

॥ सामान्यार्थः ॥

पूर्वंविद्युज्जलघनशक्तिरित्युदीरितम् । तस्यांतदितरध्वान्तविद्युच्छक्त्योर्यथाक्रमम् ॥६॥
तत्तद्भागानुसारेणपुनस्सम्मेळनात्स्वतः । जलेप्रसारितसृष्टिरेखानुसारतःक्रमात् ॥७॥
तस्मिन्विद्युज्जलेतद्ब्रह्मांडोत्पत्तिरितिस्मृतम् ॥

॥ शक्त्यंशास्सृष्टिविलासेनिरूपितः ॥

शक्तयस्त्रिविधाःप्रोक्ताब्रह्मांडोत्पत्तिहेतुकाः । सृष्टिरेखासुवर्तन्तेस्वभावादेवकेवलम् ॥८॥
तासुविद्युद्ध्वान्तशक्तीसृष्टिरेखास्वरूपके । एकाविद्युज्जलघनशक्तिर्व्यापकरूपिणी ॥९॥
क्रमादेतज्जलघनशक्त्यांसम्यक्स्वभावतः । रेखाविद्युद्ध्वान्तशक्त्योस्तत्तद्भागानुसारतः ॥१०॥
संमेळनात्स्वभावेनवेगात्तद्वैद्युतोदके । संघर्षणंभवेत्पश्चात्तद्वेगेनस्वभावतः ॥११॥

### THE GENERAL SENSE.

By the natural combination of the component parts of the two powers viz., electricity and darkness, present in the lines along which Brahmandas are situated, Brahmandas manifested in the said lines proceeding from water in the form of electricity.

Dealing with the nature and component parts of the above shaktis, Srushti Vilasa observes as follows :—

The Shaktis which are the origin of Brahmandas are said to be three. These three powers are present in the paths of Brahmandas. Of these, electricity and darkness are the two powers of which the lines are formed. The third power viz., Jalaghana shakti is not an essential factor of the composition of those lines but gains entrance in them by penetration. It is therefore known as "Vyapaka Shakti". Well, on account of the natural combination of the two shaktis viz., electricity and darkness with Jalaghana shakti, a rapid friction resulted in water in the form of electricity. By this friction, another shakti, Badaba by name, having heat to the extent of one Mahapadma degrees came to existence. By the extreme heat of

महापञ्चोष्णस्वरूपाकाचिच्छक्तिर्महत्तरा । संजाताबाडबानाममहाज्वालासमाकुला ॥१२॥
क्षीरेमंडनवत्पश्चात्तच्छक्तेरुष्णतःक्रमात् । विद्युज्जलैकांशमात्रमंडत्वमभजत्स्वतः ॥१३॥
एतद्ब्रह्मांडमित्याहुश्शास्त्रेषुज्ञानवित्तमाः । यथाचौदुंबरेवृक्षे आमूलाग्रंफलोदयः ॥१४॥
भवेत्तथैवासमंतात्सृष्टिरेखासुभूरिशः । अनेककोटिब्रह्माण्डान्येवमेवभवन्तिहि ॥१५॥
इत्यादि ॥

॥ भागांशनिर्णयः कृतः तत्रैव ॥

तत्रव्यापकशक्त्यंशस्त्रैकांशइतिकीर्तितः । पंचैकांशइतिप्रोक्तंविद्युच्छक्तेस्तथैवहि ॥१६॥
तमोशक्तेर्दशैकांशइतिभागविनिर्णयः ॥ इत्यादि ॥

---

this Badaba power one-tenth part of water in the form of electricity got solidfied just as cream is formed on the surface of milk. It is this solid, that savants of scientific lore of yore declare in shastras, as a Brahmanda. It is further stated that myriads of such Brahmandas manifest in this way, throughout the paths branching from out of water in the form of electricity, just as fruits in all branches of a glomerous fig tree.

The proportion of the component parts of the above powers is shown in the following table, in accordance with the work above quoted.—

| Name of power | Amount of the component parts |
|---|---|
| 1. Vyapaka shakti | .... 1/3 part |
| 2. Electricity | ... 1/5 ,, |
| 3. Darkness | ... 1/10 ,, |

Thus ends the commentary of this aphorism.

॥ सूत्रम् ३३ ॥

# ॥ एतत्पञ्चदशात्मकः कुण्डलिन्याम् ॥

॥ बो. वृ ॥

ब्रह्माण्डानांपूर्वसूत्रेस्मृतमुत्पत्तिकारणम् । श्वेतवाराहकल्पब्रह्माण्डस्यचयथाक्रमम् ॥१॥
स्थानंसंख्यांचगणितागममार्गनुसारतः । कीर्त्यंतेस्मिन्संग्रहेणतेषुसम्यग्यथाविधि ॥२॥
तत्रवाराहकल्पब्रह्मांडमादिपदात्स्मृतम् । द्वितीयपदतस्तद्वत्तत्संख्यासन्निदर्शिता ॥३॥
तृतीयपदतश्चापितत्स्थानंसन्निदर्शितम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥४॥

॥ सामान्यार्थः ॥

अव्यक्तपंजरस्थितविद्युज्जलोपरिक्रमात् । ब्रह्माण्डानांसृष्टिरेखापंथानस्सर्वतोमुखाः ॥५॥
संत्यनन्तास्स्वभावेनतन्मध्येतुयथाक्रमम् । अस्तिकाचित्कुंडलिनीनामरेखाशलाकवत् ॥६॥

APHORISM 33.

This Swetha Varaha Kalpa Brahmanda is numbered the fifteenth crore in Kundalini, one of the paths of the Brahmandas.

This is the aphorism

THE COMMENTARY.

The cause of creation of Brahmandas was dealt with in the previous aphorism. The situation and the serial number of one of them viz., the Swetha varaha kalpa Brahmanda will be briefly and authoritatively explained in this aphorism.

Of the three words of this aphorism, the first stands for the Sewtha varaha kalpa Brahmanda. The second word gives the serial number viz., 15th crore occupied by that Brahmanda. The third word names the position or situation of that Brahmanda. Having thus given the meaning of the words of the aphorism, we shall deal with its general sense.

THE GENERAL SENSE.

On the surface of water in the form of electricity, present in the Avyakta Panjara, there exist countless number of paths

यथोदुंबरवृक्षेसंत्यामूलाग्रंफलानिहि । तथैवतत्कुंडलिनीरेखायांचविशेषतः ॥७॥
अनेककोटिब्रह्मांडान्यामूलाग्रंवसंतिहि । तेष्वेतच्छ्वेतवाराहकल्पब्रह्मांडगोळकम् ॥८॥
अव्यक्तात्पंचदशकोट्यात्मकमितिस्फुटम् । वाल्मीकिगणितरीत्यागणितागमपारगैः ॥९॥
विशदीकृत्यविधिवन्निर्णितंविबुधैःक्रमात् । ननुवाराहकल्पस्यब्रह्माण्डगणनेक्रमात ॥१०॥
संख्याभेदेनविबुधाःपरस्परंविरोधतः । वदन्तिनानाप्रभेदात्तस्मादंडंयथार्थतः ॥११॥
निश्चित्यपंचदशकोट्यात्मकमितिक्रमात् । कथंनुवक्तुंतस्माच्छास्त्रंनिरर्थकम् ॥१२॥
बाढं (नूनं) त्वयायदुक्तंतच्छास्त्रंनसहतेयतः । शास्त्रानुभवदूरत्वात्केवलंस्यान्निरर्थकम् ॥१३॥
शास्त्रप्रमाणमस्माकंस्वानुभूतिस्तथैवच । तस्माद्यदुक्तमस्माभिर्ब्रह्मांडगणनेक्रमात् ॥१४॥
शास्त्रानुभवसिद्धत्वात्ज्ञानिनांग्राह्यमेवतत् । निंदंतुवापिनन्दंतुवज्ञानाच्छास्त्रपराङ्मुखाः ॥१५॥
श्वेतवाराहकल्पब्रह्माण्डस्यगणनक्रमे । कावाहानिस्तत्प्रमाणंसमालोच्यात्रकीर्त्यते ॥१६॥

on all sides, to accommodate the Brahmandas. One of them is Kundalini, which is like a straight bar of iron and throughout it are accommodated many crores of Brahmandas just like nuts and fruits in the branches of a glomerous fig tree from the bottom to the top. Of these several Brahmandas in Kundalini, the Swetha varaha kalpa brahmanda bears the serial number of 15th crore from the Avyakta kendra, as calculated by expert mathematicians of yore, according to the Valmiki Ganita.

On this statement one may raise an objection, thus—
"Well sir, it is an admitted fact that scholars, while calculating the rank of the Brahmandas, differ in the rank they give to the Swetha varaha kalpa Brahmanda. So how can it be established that the rank of the Swetha varaha kalpa Brahmanda is fifteenth crore ? Mathematical calculations require precision and since scholars fail to arrive at a definite number as the rank of this Brahmanda but differ enormously, the above statement is wrong and the shastra is therefore erroneous."

The author answers this objections as follows—
"Well, O wise opponent, it behoves persons of your stamp

॥ तदुक्तमण्डनिर्णयाधिकारे ॥

ब्रह्माण्डपरिगणनविधौगणितशास्त्रतः । गणितज्ञैर्निर्णितानिकेंद्राणिद्वादशक्रमात् ॥१७॥
ब्रह्माण्डकल्पोक्तरीत्यातेषांनामान्यथाक्रमम् । संगृह्यात्रयथाशास्त्रंसंग्रहात्सन्निरूप्यते ॥१८॥
महापथोऽव्यक्तकूर्मवारुणोकिरणस्तथा । ज्वालामुखोवृष्णिचक्रोवातस्तंभोग्रहस्तथा ॥१९॥
शेषोगजधृवश्चेतिप्रोक्तास्युर्द्वादशधृवाः । एकैकधृवमारभ्यब्रह्माण्डान्तंयथाविधि ॥२०॥
गणितागमोक्तरीत्यागुणितंचेद्यथाक्रमम् । ब्रह्माण्डगणनविधिर्भिन्नतेकेंद्रभेदतः ॥२१॥
महापथक्रमेणेतद्ब्रह्मांडंगणयेद्यदि । लक्षाणांषोडशतथाषट्सहस्रोपरिक्रमात् ॥२२॥
एकादशोत्तरशतात्मकोंडमितिकीर्त्यते । अव्यक्तकेंद्रात्तत्पंचदशकोट्यात्मकंभवेत ॥२३॥

to raise such an objection. But note that it is quite opposed to the shastra as well as practical experience of mathematical calculations and so your objection becomes useless. On the other hand note that our statement is backed up both by the Shastra and experience and so it is accepted by the learned. Those that are ignorant of the shastra may appreciate or deprecate it. It does not in the least affect the theory propounded by the above statement. With a view to prove the error of your objection and the precision of our statement, we shall explain the method of calculating the rank of the Swetha varaha kalpa brahmanda, as given in Anda Nirnayadhikara, thus—

"Expert mathematicians declare that there are twelve kendras, centres or starting-points, whence the rank of the Swetha varaha kalpa brahmanda is calculated and determined. We shall give below the names of those kendras as enumerated in Brahmanda kalpa.

List of kendras or starting points.

| | | | |
|---|---|---|---|
| 1. Mahapatha | kendra mukha. | 7. Vrishni chakra | kendra mukha. |
| 2. Avyakta | ,, | 8. Vata stambha | ,, |
| 3. Koormadhruva | ,, | 9. Graha | ,, |
| 4. Varunidhruva | ,, | 10. Sesha | ,, |
| 5. Kirana | ,, | 11. Gaja | ,, |
| 6. Jwala mukha | ,, | 12. Dhruva | ,, |

तदेवंकूर्मध्रुवात्संगुण्यतेचेद्यथाविधि । पंचाशत्कोट्यैकलक्षत्रिसहस्रशतात्मकम् ॥२४॥
श्वेतवाराहकल्पब्रह्मांडंभवतिसंख्यया । पुनस्तद्वारुणकेंद्रस्थानात्संगुण्यतेयदि ॥२५॥
दशकोट्यशीतिलक्षदशसाहस्रकोपरि । द्वात्रिंशदुत्तरशतात्मकंभवतिहिक्रमात् ॥२६॥
एवंक्रमेणकिरणकेंद्रस्थानादिभिःक्रमात् । संगुण्यतेचेद्ब्रह्मांडस्थानसंख्यापृथक्पृथक् ॥२७॥
प्रभिद्यतेविशेषेणतत्तत्केंद्रप्रभेदतः । अव्यक्तकेंद्राद्गणितगणनक्रमभेदतः ॥२८॥

"Thus the number of the Swetha varaha kalpa Brahmanda differs according to the difference of the kendra, whence the number is counted. We shall take a few instances and prove thereby how this difference in calculation results. The number or rank of the Swetha varaha kalpa brahmanda is found to be 1606111th when calculated from Maha patha; fifteenth crore when calculated from Avyakta kendra mukha; fifty crores, one lakh, three thousand and one hundredth from koorma dhruva kendra mukha; ten-crores, eighty lakhs, ten thousand one hundred and thirty-second from Varuni kendra mukha. In this way when calculated from the said other kendras such as kirana kendra mukha and so on, the number and rank of the Brahmanda will be found to vary considerably, of course, considering the kendra or origin whence the calculation is made.

"In conclusion, it is to be noted that the rank of the Swetha varaha kalpa brahmanda, when calculated from the Avyakta kendra mukha has been found to be fifteenth crore and it is this number that is mentioned in the above statement. It must be borne in mind here that though the ranks of the Brahmandas vary according to the point taken for calculation, yet all of them point to the same brahmanda viz., the Swetha varaha kalpa brahmanda. Thus the number cited in the above statement with reference to the Swetha varaha kalpa Brahmanda has been accepted by shastras as precise and authenticated. So, O wise opponent, the objection you put forth has been proved to be mischievous, while the statement of the shastra is quite correct and unobjectionable."

श्वेतवाराहकल्पब्रह्मांडमत्रयथाक्रमम् । निर्णितंस्यात्पंचदशकोट्यात्मकमितिस्फुटम् ॥२९॥
एतेनब्रह्मांडभेदंवर्क्तुंनभवतिध्रुवम् । एवंशास्त्रप्रमाणत्वाद्ब्रह्मांडगणनक्रमः ॥३०॥
अंगीकृतंहिविद्वद्भिस्सिद्धान्तत्वेनकेवलम् । तस्माद्यदुक्तंशास्त्रेतत्पूर्वपक्षमसंगतम् ॥३१॥

॥ सूत्रम् ३४ ॥

# ॥ शतकोट्योजनप्रमाणमेतत् ॥

॥ बो. वृ. ॥

ब्रह्मांडसंख्यांस्थानंचपूर्वसूत्रेनिरूपितम् । तत्प्रमाणंचसूत्रेस्मिन्यथाशास्त्रंप्रचक्षते ॥१॥
प्रमाणबोधकपदद्वयमस्मिन्विनिर्णितम् । तत्रादिमपदादंडप्रमाणंसंप्रदर्शितम् ॥२॥
द्वितीयपदतस्तद्वद्ब्रह्मांडसन्निरूपितम् । पदार्थमेवमुक्तशास्यसामान्यार्थोनुनोच्यते ॥३॥

By this it is to be noted that the rank of the Swetha varaha kalpa Brahmanda viz., 15th crore mentioned in the above statement has been confirmed. This is the general sense of the aphorism.

APHORISM 34.

The extent of this Swetha varaha kalpa brahmanda is one hundred crores of yojanas. This is the aphorism.

THE COMMENTARY.

The previous aphorism dealt with the rank and the position of the Swetha varaha kalpa brahmanda. This aphorism gives the extent of this brahmanda according to shastric calculation.

Of the two parts of this aphorism the first mentions the extent of the brahmanda while the second gives the name of the brahmanda. This is the interpretation of the two parts of the aphorism.

THE GENERAL SENSE.

The learned have calculated the extent of the several crores of brahmandas in creation and have put down their results

॥ सामान्यार्थः ॥

अनेककोटिब्रह्मांडप्रमाणानियथाक्रमम् । शास्त्रेष्वनेकधासम्यक्प्रोक्तानिज्ञानवित्तमैः ॥४॥
तेषुवाराहकल्पब्रह्मांडमानंप्रमाणतः । शतकोट्योजनमितिनिर्णितंसूत्रतःक्रमात् ॥५॥

॥ तदुक्तमण्डकौस्तुभे ॥

पंचाशत्कोटिविस्तीर्णंपंचाशत्कोटिरुन्नतम् । आहत्यब्रह्मांडमानंशतकोट्योजनंविदुः ॥६॥

इत्यादि ॥

clearly and severally in shastras Thus the extent of the Swetha varaha kalpa brahmanda is said to be one hundred crores of yojanas.

This statment is corroborated by another shastra viz., Anda kaustubha, thus.

The learned declare in shastras that the Swetha varaha kalpa Brahmanda is 50 crores yojanas in circumference and 50 crores in breadth and that summing them together it is one hundred crores yojanas in extent. Such is the general sense of this aphorism.

---

॥ सूत्रम् ३५ ॥

# ॥ अथोच्यतेशक्तिपञ्जरमस्मिन् ॥

॥ बो. वृ ॥

पूर्वसूत्रेण्डप्रमाणमुक्तमस्मिन्तथैवहि । सृष्टिलिंगप्रदर्शकशक्तिपंजरमुच्यते ॥१॥
चत्वारितत्प्रबोधकपदान्यस्मिन्यथाक्रमम् । तत्रादिमपदादानन्तर्यार्थस्सन्निदर्शितः ॥२॥
द्वितीयपदतस्तद्वत्क्रियार्थस्संप्रदर्शितः । तृतीयपदतश्शक्तिपंजरंसमुदीरितम् ॥३॥
सूत्रंचतुर्थपदतस्सूचितंस्याद्यथाक्रमम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥४॥

॥ सामान्यार्थः ॥

एतावत्पर्यन्तमस्मिन्शास्त्रेब्रह्माण्डनिर्णयः । सप्रमाणंसंग्रहेणविविच्यपरिकीर्तितम् ॥५॥

APHORISM 35.

Thereupon will be dealt with the Shakti Panjara in this aphorism.

This is the aphorism.

THE COMMENTARY.

The extent of the Swethavarahakalpa brahmanda was determined in the previous aphorism. The Shakti Panjara exhibiting the marks of creation of the Universe will similarly be treated in this aphorism.

This aphorism consists of four words dealing with the Shakti Panjara. Of these the first word refers to the context viz., subsequent to the previous aphorism. The second word is the verb. The third word names the Shakti Panjara. The fourth word, in order, indicates the aphorism mentioned above. Having thus given the meanings of the words of the aphorism, its purport will now be given.

THE PURPORT OF THE APHORISM.

This shastra has so far depicted the process of creation of Swethavarahakalpa Brahmanda authentically and briefly. Now

अथेदानीमात्मकृतशक्तिपंजरमद्भुतम् । सिसृक्षताशक्तिमयंसृष्ट्यङ्कनप्रदर्शकम् ॥६॥
क्रमात्संकीर्त्यतेसम्यक्सप्रमाणंयथाविधि । पश्चाद्विद्युज्जलेव्यक्तपुरुषस्यचिदात्मनः ॥७॥
सिसृक्षताशक्तिरूपवीर्यमेवयथाक्रमम् । कल्पयद्ब्रह्मांडमेतच्छतकोट्योजनोन्नतम् ॥८॥
तदाकारंवर्तुलमित्युच्यतेकुक्कुटाण्डवत् । सृष्ट्यर्थंजगतस्तस्मिन्सूक्ष्मशब्देनसंयुतम् ॥९॥
चित्ताकाशंजगद्बीजंसंददेजगदीश्वरः । पश्चात्तद्वरैकालविपाकेनस्वभावतः ॥१०॥
शब्दगर्भान्माविद्युत्प्रकाशस्समजायत । तत्प्रकाशोन्तर्बहिश्चव्याप्यांडंहेमवत्क्रमात् ॥११॥
प्रकाशरूपमकरोदासमंतात्स्वशक्तितः । संग्राह्यपश्चादंडस्थप्रकाशंसर्वतोमुखम् ॥१२॥
तदंडमध्येभगवान्सन्नियम्यैकरूपतः । यथाचित्रंलेखयितुंचित्रकारोयथाविधि ॥१३॥
अत्यंतशुद्धंसुदृढमादौशास्त्रानुसारतः । पटमेकंकल्पयतिस्वसंकल्पानुसारतः ॥१४॥
तथोपादाननिमित्तशक्तिभ्यामतिविस्तरात् । जगच्चित्रंलेखयितुंजगदीशोनिरंजनः ॥१५॥

the Shakti Panjara which points out the marks of the evolution of the Universe, which is in the form of Sisrukshata Shakti, which is wonderful and which is invented by Paramatma, will be described.

Thereupon in the said Vidyut jala or water in the form of electricity existing on the Avyakta Panjara it was the semen in the form of Sisrukshata shakti of Avyakta Purusha or unmanifest Being who is in the form of chit, that produced Swethavarahakalpa brahmanda, one hundred crores of yojanas in height. The learned declare that the shape of this brahmanda is of the figure of an egg of a hen. For the sake of the creation of the Universe Parameswara mixed with that brahmanda, His Chittakasa which is the original seed of creation and which contains Sookshma shabda or subtle sound. Thereupon in due course of time a wonderful electric brilliance was naturally produced from out of the womb of the Sookshma shabda, present in that Chittakasa. This brilliance then by virtue of its power, pervaded all sides of the brahmanda both in and out and made it appear in the form of golden brilliance. Afterwards the Lord Almighty attracted the brilliance sparkling on all sides of the brahmanda and concentrated it at the centre of the

अव्यक्तसिसृक्षताशक्त्यांगुणशक्तीस्समांशतः । संयोज्यसृष्टिसंकल्पानुसारेणयथाक्रमम् ॥१६॥
तेजस्तिमिरसंयुक्तंनिर्ममेशक्तिपंजरम् । तस्मिन्सर्वजगत्सृष्टिर्लक्ष्मणासंप्रदर्श्यते ॥१७॥

॥ सूत्रम् ३६ ॥

# ॥ ध्वान्तसंयोगत्वात्पिण्डत्वंतस्य ॥

॥ बो. वृ ॥

तेजस्तिमिरसंयुक्तंजातंपूर्वसूत्रतः । उक्तत्रास्मिन्तत्प्रत्यभासःपिंडत्वंकीर्त्यतेधुना ॥१॥
पदानित्रीणिसूत्रेस्मिन्निर्णितानियथाक्रमम् । तत्रादिमपदाद्व्यक्तांधकारोनिदर्शितः ॥२॥

brahmanda. Then just as an artist prepares a very clean, strong cloth, (paper, glass or the like) with a view to delineate the drawing on it as per his desire, so also the Lord of the universe who is free from Maya with a view to delineate the picture of the universe as per His volition, by means of His Upadana and Nimitta shaktis, first prepared Shakti Panjara consisting of light and darkness by mixing equal portions of Satwa, Raja and Tama shaktis with Sisrukshata shakti. In this Shakti Panjara the creation of the entire universe is well shown by marks.

Note—(1) Upadana here means Maya shakti.
(2) Nimitta here means Ikshana shakti.

## APHORISM 36.

By the contact of darkness the brilliance at the centre of the Shakti Panjara got the shape of a Pinda or a human body. This is the aphorism.

## THE COMMENTARY.

Having described the Shakti Panjara composed of light and darkness by the previous aphorism now by this aphorism how the said light got the shape of a Pinda or a human body will be dealt with.

तत्प्रकाशस्यपिंडत्वंद्वितीयपदतस्स्मृतम् । पंजरस्थज्योतिरुक्तंतृतीयपदतस्तथा ॥३॥
पदार्थमेवमुक्त्वास्यसूत्रस्यविधिवत्क्रमात् । अथेदानींसंग्रहेणसामान्यार्थोनिरूप्यते ॥४॥

॥ सामान्यार्थः ॥

शक्तिपंजरमध्यस्थकेंद्रशक्त्यपकर्षणात् । क्रमात्तत्रत्यांधकारस्तत्केंद्रस्थद्युतेस्स्वतः ॥५॥
अधस्स्थादर्धभागंसमावृणोत्स्वीयशक्तितः । आत्मनस्सृष्टिसंकल्पानुसारेणैवकेवलम् ॥६॥
पश्चात्तदन्तराळस्थप्रकाशोध्वान्तयोगतः । शिरःपाण्यादिभिर्युक्तंपिंडाकारंप्रपेदिरे ॥७॥
तत्पिंडमेवप्रथमशरीरीतितथैवहि । हिरण्यगर्भइतिचविधाताब्रह्मइत्यपि ॥८॥
चतुर्मुखस्सृष्टिकर्तास्वयंभूरितिचक्रमात् । प्रवदन्तिविशेषेणशास्त्रेषुब्रह्मवादिनः ॥९॥
इतिपंजरमध्यस्थप्रकाशार्धस्यसूत्रतः । पिंडत्वंध्वांतसंयोगादभूदितिविनिर्णितम् ॥१०॥

This aphorism consists of three words. Tho darkness of Avyakta is referred to by the first word. By the second word is stated the shape of a Pinda or a human body assumed by the brilliance present in the Shakti Panjara. Similarly the brilliance present in the Shakti panjara is mentioned by the third word. Having given as usual the meaning of the words in the aphorism, now the general sense of the aphorism will be given briefly.

THE GENERAL SENSE.

By the attraction of the power at the centre of the Shakti Panjara, the darkness, present in the shakti kendra, of its own accord and by its own force, pervaded the lower half of the said brilliance gradually. Thereupon in accordance with the srushti sankalpa or the Cosmic Ideation of Atma, the splendour existing within that Panjara, by the contact of darkness got the shape of a human body—with a head, limbs etc. It is this human form that is described by the knowers of Brahman as the one who had the first body, Hiranya garbha, Vidhata, Brahma, Chaturmukha or the four-faced, Srushti Karta or the Agent of creation, Swayambhu or self-created and so on in the Shastras. In this way this aphorism proves that the splendour existing at the centre of the Shakti Panjara, by the contact of darkness, got the shape of a Pinda or a human body.

॥ तदुक्तंसृष्टिविलासे ॥

शक्तिपंजरमध्यस्थप्रकाशस्ययथाक्रमम् । तत्रत्यध्वांतसंयोगादर्धभागस्स्वभावतः ॥११॥
तदधस्थात्पिंडरूपमभूदीशाज्ञयाक्रमात् ॥ इति ॥

॥ सूत्रम् ३७ ॥

## ॥ तत्कल्पस्यातद्ब्रह्माण्डभेदनं कालविपाकान्नारिकेळवत् ॥

॥ बो. वृ. ॥

पूर्वसूत्रेप्रकाशस्यपिंडत्वंसमुदीरितम् । अथेदानींकीर्त्यतेस्मिन्ब्रह्मांडस्यविभेदनम् ॥१॥
तत्रादिमपदात्सम्यक्पिंडशक्तिर्निरूपिता । द्वितीयपदतस्तद्ब्रह्मांडभेदनमीरितम् ॥२॥
तृतीयपदतःकालविपाकस्सन्निदर्शितः । तथाचतुर्थपदतोदृष्टान्तस्संप्रकीर्तितः ॥३॥
पदार्थमेवमुक्त्वास्यसंग्रहेणयथामति । अथेदानींसमासेनसामान्यार्थःप्रचक्षते ॥४॥

In this connection Srushti Vilasa observes as follows:—

By the gradual contact of darkness present in the Shakti Panjara, the lower half of the splendour existing in that Shakti Panjara, naturally got the shape of a Pinda or human body, by the order of the Lord of the Universe.

APHORISM 37.

In due course, the Swethavarahakalpa Brahmanda on account of the force of the aforesaid Pinda or the human body, was split into two parts just like a cocoanut. This is the aphorism.

THE COMMENTARY.

Having established in the previous aphorism how the splendour at the centre of the shakti panjara assumed the form of a human body, now, in this aphorism the division of the Swethavarahakalpa Brahmanda will be dealt with.

॥ सामान्यार्थः ॥

अण्डस्योत्पत्तिमारभ्यपुनस्तच्छेदनावधि । देवमानानुसारेणसंवत्सरइतीरितः ॥५॥
सएवकालविपाकादित्यत्रकालशब्दतः । उक्तंतदंडमध्यस्थपिंडस्यापितथैवहि ॥६॥
विपाकशब्दात्प्रोक्तंस्यात्परिपाकोभिवृद्धये । तथैववर्तुलाकारंनारिकेळफलंक्रमात् ॥७॥
ताडनाद्विद्यतेसम्यक्समभागंयथाद्विधा । तथैवश्वेतवाराहकल्पब्रह्मांडमप्यथ ॥८॥
तत्पिंडशक्त्याभिवृद्धिंगतयाकालमानतः । विभाजितमभूद्द्वेधामध्यभागात्समंयथा ॥२॥
१

---

The first word of this aphorism refers to the force of the said human form. Similarly the division of Swethavarahakalpa Brahmanda is mentioned by the second word. The requisite period of time for the purpose is fixed by the third word. In the same way the fourth word indicates an example. Having explained the meaning of the words of the aphorism to the best of our knowledge we shall now try to give out its general sense thus.

THE GENERAL SENSE.

From the time of the origin of the Swethavarahakalpa Brahmanda till the time of its splitting into two parts, the time that lapsed is said to be a year according to the calculation of time of the Devas. So the word Kala occurring in the expression "Kala Vipakath" points out this period of one Deva year. Similarly the word "Vipakath" mentions a hot power that emanated for the growth of the human body present at the centre of that Brahmanda. The Swethavarahakalpa Brahmanda, by the power of the said human body, at the end of the period required for its ripening, got split into two equal parts just like a round cocoanut gets split into two equal pieces by cracking it carefully.

---

॥ सूत्रम् ॥

# ॥ ततस्तच्छक्त्यातदूर्ध्वाधस्तत्कपालयोः प्रतिष्ठा ॥

॥ बो. वृ. ॥

ब्रह्मांडभेदनंपूर्वसूत्रेशक्तयानिरूपितम् । अस्मिन्प्रतिष्ठास्थानंचकीर्त्यतेतत्कपालयोः ॥१॥
एतत्प्रबोधकपदान्यस्मिन्पंचयथाक्रमम् । पदच्छेदनतस्सम्यङ्निर्णितानिस्फुटंयथा ॥२॥
आनन्तर्यार्थमुक्तंस्यात्तत्रादिमपदात्तथा । अंडस्यबीजशक्तिर्यासाद्वितीयपदात्स्मृता ॥३॥
अंडस्योर्ध्वाधः प्रदेशौतृतीयपदतस्स्मृतौ । चतुर्थपदतोंडस्यकपालद्वयमीरितम् ॥४॥
तथैवपंचमपदात्प्रतिष्ठोक्ताकपालयोः । पदार्थमेवमुक्त्वास्यसामान्यार्थोत्रकीर्त्यते ॥५॥

APHORISM 38.

Then by that force the two pieces (of the Swethavarahakalpa Brahmanda) were established at the upper and the lower directions of the Brahmanda. This is the aphorism.

THE COMMENTARY.

The previous aphorism dealt with the splitting up of the Brahmanda formed by Sisrukshata Shakti which is in the form of Avyakta Brahmanda present in that Brahmanda. The place where the two pieces were located will be determined in this aphorism.

This aphorism consists of five words dealing with the establishment (of the said pieces.) The first of these words refers to the time subsequent to the action mentioned in the previous aphorism. The Srushti Beeja shakti or the power of the seed of creation has been referred to by the second word. The third word names the upper and the lower directions of the Brahmanda. The two pieces into which the Brahmanda was split have been pointed out by the fourth word. The fifth word indicates the locality where the two pieces were established. Having thus given the meaning of the words of the aphorism, its purport will now be given thus.—

॥ सामान्यार्थः ॥

पश्चात्पूर्वोक्तब्रह्मांडस्थितशक्त्यायथाक्रमम् । श्वेतवाराहकल्पस्यब्रह्मांडोर्ध्वप्रदेशके ॥६॥
तथैवाधःप्रदेशे चतद्ब्रह्मांडकपालयोः । कृतंप्रतिष्ठासृष्ट्यर्थंकर्तुंतच्छक्तिपंजरम् ॥७॥

THE PURPORT OF THE APHORISM.

The two pieces of the Brahmanda into which it was split were thereafter stationed at the upper and the lower directions of the Brahmanda, by Sisrukshata shakti which is in the form of beeja or seed of Avyakta Brahma present in the said Brahmanda. This is the purport of the aphorism.

॥ सूत्रम् ३९ ॥

## ॥तदाकर्षणात्तमप्रकाशयोर्द्वैविध्यमव्यक्तस्य ॥

॥ बो वृ ॥

पूर्वसूत्रेण्डकपालप्रतिष्ठासन्निरूपिता । अव्यक्तध्वान्तप्रकाशविभागोस्मिन्प्रचक्षते ॥ १ ॥
सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम् । तत्रादिमपदात्तत्कपालाकर्षणमीरितम् ॥ २ ॥
अव्यक्ततमप्रकाशौद्वितीयपदतस्स्मृतौ । पश्चात्तृतीयपदतस्तद्विभागोनिदर्शितः ॥ ३ ॥
तद्वच्चतुर्थपदतोव्यक्तशक्तिर्निरूपिता । एवंपदार्थमुक्त्वाथसामान्यार्थो निरूप्यते ॥ ४ ॥

॥ सामान्यार्थः ॥

कपालद्वयमध्यस्थशक्त्याकर्षणतःक्रमात् । पूर्वोक्ताव्यक्तमंडलप्रकाशध्वान्तयोर्द्विधा ॥ १ ॥

APHORISM 39.

By its attraction the Avyakta got itself split up into two viz darkness and light.

THE COMMENTARY.

The fixture or location of the Anda Kapalas or the two halves of the brahmanda was stated in the previous aphorism. The two states, darkness and light into which the Avyakta was split up, will be explained in this aphorism.

There are four words in this aphorism. The first word refers to the attraction of the two halves of the Brahmanda The second word names the darkness and light of Avyakta. Then the third word mentions the process of their division or separation. Similarly the shakti of the Avyakta globe is pointed out by the fourth word. Having thus given the meanings of the words of the aphorism, next its general sense will be explained.

THE GENERAL SENSE OF THE APHORISM.

By the attraction of the two forces present in the centres of the two kapalas or halves of the brahmanda the darkness and light in the womb of Avyakta broke open the womb and came out just as the young ones of a crab split up and come out of the

विभागोभूत्स्वभावेनमाघिमागर्भवत्क्रमात । प्रश्चात्तौयंयुतुस्तत्कपालस्थानंप्रतिस्वत: ॥ ६ ॥

॥ तदुक्तं ब्रह्माण्डसारे ॥

कपालद्वयमध्यस्थाव्यक्तमंडलसंस्थितौ । ध्वान्तप्रकाशौवेगेनतच्छक्त्याकर्षणात्स्वत: ॥ ८ ॥

द्विधाभूत्वातयो:पश्चादूर्ध्वांशोवेगतस्स्वयम् । ऊर्ध्वस्थितांडकपालमध्यकेन्द्रमवापहि ॥ ७ ॥

अधस्स्थिताण्डकपालमध्यकेन्द्रंतथैवच । द्वितीयांशोगमत्पश्चात्तत्रस्थैर्यमवापतु: ॥ ९ ॥

॥ सूत्रम् ४० ॥

## ॥ तदुभयसंघर्षणात्कश्यपज्योति: ॥

॥ बो वृ ॥

तमप्रकाशयोर्भेद: पूर्वसूत्रेनिरूपित: । अस्मिन्कश्यपसूर्यस्यज्योतिर्मंडलमुच्यते ॥ १ ॥

womb of a (mother) crab. Thereupon the darkness and light got into the centres of the lower and the upper halves of the Brahmanda respectively.

The same thing is stated in Brahmanandasara also thus—

The darkness and light present in the Avyakta globe in the middle of the two halves of the Brahmananda on account of the attraction of the forces of the centres of those halves, got themselves divided into two. Then the light at the upper side got into the centre of the upper half of the Brahmanda, while the darkness got into the centre of the lower half. The darkness and the light which got into these centres of the lower and the upper halves of the Brahmananda stuck fast to those places. Thus the work continues.

This is the general sense of the thirty-ninth aphorism.

APHORISM 40.

By the friction of these two, Kasyapa Jyoti or a luminous globe namely Kasyapa came into existence.

The COMMENTARY.

The scission or the division into two of the Avyakta globe was dealt with in the previous aphorism and the origin of the solar globe called Kasyapa will be traced in this aphorism.

पदद्वयंहिसूत्रेस्मिन्निर्णितंसंप्रदायतः । तत्रादिमपदात्कुक्षिसंघर्षणःप्रदर्शितः ॥ २ ॥
कश्यपोत्पत्तिरुक्तास्याद्द्वितीयपदतस्तथा । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥ ३ ॥

॥ सामान्यार्थः ॥

कपालद्वयशक्त्योरव्यक्तशक्त्योःपरस्परम् । अत्यन्तसंघर्षणेनबृहदाकारतःक्रमात् ॥ ४ ॥
सृष्टेस्समष्टिबीजशक्तिरूपमचञ्चलम् । बहिरुष्णंतथैवान्तश्शीतलंसर्वतोमुखम् ॥ ५ ॥
नानाविचित्रकिरणैस्संयुतंसृष्टिकारकम् । समुद्भूतंस्वभावेनकश्यपज्योतिमण्डलम् ॥ ६ ॥

॥ ब्रह्माण्डसारेपि ॥

अव्यक्तागर्नीषोमशक्तीविभज्यजगदीश्वरः । सृष्ट्यर्थंजगतस्तत्कपालयोरुभयोरपि ॥ ८ ॥
अधःकपालेंधकारशक्तिमूर्ध्वकपालके । क्रमात्प्रकाशशक्तिंचसन्ददेस्वीयतेजसा ॥ ८ ॥

There are two words in this aphorism. The first word refers to the friction of the two forces of the Avyakta globe and of the two halves of the Brahmanda. The second word names the brilliance of the Kasyapa globe.

Having thus given the literal meanings of the words of the aphorism we shall proceed to examine its general sense.

THE GENERAL SENSE OF THE APHORISM.

By the friction of the forces of the two halves of the Brahmanda and those of the darkness and light of the Avyakta globe, naturally emanated a glorious globe of brilliance namely Kasyapa which is infinitely large in size, which is in the form of an aggregate seed of creation, which is motionless, which is hot outside and cold inside, which has faces on all sides, which is the storage of and radiates many wonderful beams or rays and which conducts the propagation of the universe.

The same thing is stated in Brahmandasara also thus—

The Lord of the Universe for the proper conduct of creation separated the Agni and Soma powers, present in the Avyakta globe and by his own glory fixed the darkness in the lower half and the light in the upper half of the Brahmanda. Thereupon the forces of the halves of the Brahmanda and of Agni and Soma

पश्चात्तदुभयशक्त्योस्संघर्षणात्परस्परम् । स्वतःप्राविरभूद्दिव्यंकश्यपज्योतिमण्डलम् ॥ ९ ॥

॥ इत्यादि ॥

॥ शौनकसूत्रेपि ॥

अथातः कश्यपोत्पत्तिं व्याख्यास्यामः कपालोव्यक्तशक्त्योस्संघर्षणादव्यक्त पुरुषस्यान्तर्ज्योतिः कशयपवर्णस्थ सृष्टिशक्तीनां वसुरुद्रोड्वक्ष्यंश सम्मेळना न्मण्डलंकृत्वा तदुपाधिना कश्यपत्वंप्राप्य प्राविरभूत् ॥

॥ इत्यादि ॥

powers came into contact and thereby emanated the globe of Kasyapa of its own accord with extraordinary brilliance.

Shounaka sutra or aphorism corroborates the same, as follows:—

Let us then deal with the origin of the Sun, namely Kasyapa thus. The brilliance of Paramatman or the Avyakta being on account of the friction of the forces of the two halves of the Brahmanda and those of Avyakta, caused the powers of letters from A to Ksha which are the wombs of creation, to combine together. The powers entered into this combination are as under—

Out of the seven crores of powers present in each letter of the (Sanskrit) alphabet 8 shaktis of the letter Ka, 11 shaktis of the letter Sha, 27 shaktis of. the letter Ya and 4 shaktis of the letter Pa.

By the combination of these letter-powers, a globe was formed and by means of this upadhi the said inner brilliance manifested as the globe of the sun, Kasyapa by name.

This is the purport of the aphorism by Shounaka.
Thus ends the 40th aphorism.

---

॥ सूत्रम् ४१ ॥

# ॥ एवमव्यक्त ध्वान्ताधःकपालशक्त्योस्संघर्षणात्कूर्मपीठम् ॥

॥ बो वृ ॥

पूर्वसूत्रेकश्यपस्योत्पत्तिमुक्त्वायथाक्रमम् । कूर्मपीठोत्पत्तिरस्मिन्संग्रहेणप्रकीर्त्यते ॥ १ ॥
सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम् । तत्रादिमपदात्पूर्वक्रमस्सम्यक्प्रदर्शितः ॥ २ ॥
ध्वान्ताधःकपालशक्तीद्वितीयपदतस्स्मृते । तयोस्संघर्षणःपश्चात्तृतीयपदतस्स्मृतः ॥ ३ ॥
चतुर्थपदतः कूर्मपीठमुक्तंयथाक्रमम् । पदार्थमेवमुक्त्वास्यसामान्यार्थोनिरूप्यते ॥ ४ ॥

॥ सामान्यार्थः ॥

अधःकपालाव्यक्तान्धकारशक्त्योःपरस्परम् । संघर्षणात्समुद्भूतंकूर्मपीठंमहत्तरम् ॥ ५ ॥

APHORISM 41.

Similarly by the friction of the two shaktis, one of the darkness of Avyakta and the other of the lower half of Brahmanda, Koorma Peetha came into existence.

THE COMMENTARY.

The emanation of the solar globe of Kasyapa was deal with in the previous aphorism and the emanation of Koorma Peetha will be described in this aphorism.

This aphorism consists of four words. The first word expresses the order of the process of evolution. The second word names the two shaktis viz., the shakti of the darkness of the Avyakta and that of the lower half of Brahmanda. The third word mentions the friction of these two shaktis. The fourth word names Koorma Peetha. This is the meaning of the words of the aphorism, while its general sense is as follows

THE GENERAL SENSE OF THE APHORISM..

By the mutual friction of the shakti of the lower half of Brahmanda and that of the darkness of Avyakta in it, the glorious Koorma Peetha came into existence.

॥ इति सामान्यार्थः ॥

॥ सूत्रम् ४२ ॥

# ॥ तदुभय शक्तिसंघर्षणाद्वातस्कन्धः ॥

॥ बो वृ ॥

कूर्मपीठोत्पत्तिमुक्त्वापूर्वसूत्रेयथाविधि । वातस्कन्धोत्पत्तिरस्मिन्संग्रहेणनिरूप्यते ॥ १ ॥
पदच्छेदनतस्सूत्रेनिर्णितंस्यात्पदद्वयम् । तच्छक्तिद्वयसंयोगस्तत्रादिमपदात्स्मृतः ॥ २ ॥
वातस्कन्धोत्पत्तिरपिद्वितीयपदतस्स्मृता । पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ॥ ३ ॥

॥ सामान्यार्थः ॥

पूर्वोक्तकश्यपकूर्मपीठशक्त्योःपरस्परम् । संयोगतोखिलजगत्सृष्टिसंधारणात्मकः ॥ ४ ॥
कूर्मकश्यपयोर्मध्येवातस्कन्धस्समुद्भवौ । वातस्कन्धोत्पत्तिरेवंसूत्रेस्मिन्संप्रचक्षिता ॥ ५ ॥

APHORISM 42.

By the friction of those two shaktis Vataskandha came into existence.

THE COMMENTARY.

Having dealt with the emanation of Koorma Peetha in the previous aphorism, the author describes the emanation of Vata skandha in this aphorism.

This aphorism resolves itself into two parts. The first part refers to the two shaktis—one of Kasyapa and the other of Koorma Peetha. The second part makes mention of Vataskandha emanating therefrom.

Having given the significance of the two parts of the aphorism, we shall now proceed to examine its general sense.

THE GENERAL SENSE OF THE APHORISM.

By the friction of the said two shaktis—one of Kasyapa and the other of Koorma Peetha, Vataskandha which bears the entire created phenomena of the universe, between Kasyapa globe and Koorma Peetha. In this way the process of emanation of Vataskandha has been described in this aphorism.

॥ सूत्रम् ४३ ॥

## ॥ कश्यपवातस्कन्धशक्त्योस्संयोगात्सृष्टिगर्भोत्पत्तिस्तददितीरिति ॥

॥ श्रो वृ ॥

वातस्कन्धोत्पत्तिमुक्त्वापूर्वसूत्रेयथाक्रमम् । इदानीमदितिशक्त्युत्पत्तिरस्मिन्विधीयते ॥ १ ॥
पदानिषण्णिर्णितानिसूत्रेस्मिन्संप्रदायतः । तत्रकश्यपवातस्कन्धशक्ती आदिमात्स्मृते ॥ २ ॥
द्वितीयपदतस्ततसंयोगस्सम्यक्प्रदर्शितः । तृतीयपदतस्सृष्टिगर्भोत्पत्तिर्निरूपिता ॥ ३ ॥
चतुर्थपदतोत्पत्तिरेवसम्यङ्निदर्शिता । तथैवपंचमपदान्नामतस्यैवकीर्तितम् ॥ ४ ॥
तथैवषष्ठमपदान्निश्चयार्थोनिरूपितः । पदानामेवमुक्तआर्थसामान्यार्थोस्यकीर्त्यते ॥ ५ ॥

॥ सामान्यार्थः ॥

पूर्वोक्तवातस्कन्धकश्यपशक्त्योःपरस्परम् । संयोगात्सृष्टिगर्भाख्याकाचिच्छक्तिरजायत ॥ ६ ॥

### Aphorism 43.

By the combination of the shaktis of Kasyapa and Vata-skandha another shakti, Srushti Garbha by name came into existence, which is also known as Aditi.

### The Commentary.

The previous aphorism explained the process of emanation of Vataskandha, while this aphorism describes how Aditi shakti comes into existence. There are six words in this aphorism. The first word refers to the shaktis of Kasyapa and of Vataskandha. The second word mentions the combination of those two shaktis. The third word names the emanation of the shakti of Srushti Garbha. The fourth word is a pronoun standing for the preceding noun The fifth word gives another name, Aditi to that shakti. The sixth word confirms that name. This is the significance of the words of the aphorism while its purport runs as follws.

### The Purport of the Aphorism.

By the combination of the shaktis of Kasyapa and Vata-skandha mentioned above, a certain shakti by name Srushti

सैवादितिरितिप्रोक्ताशास्त्रेषुज्ञानवित्तमैः । इतिसंग्रहतस्सामान्यार्थोस्यप्रतिपादितः ॥ ८ ॥

॥ सूत्रम् ४४ ॥

# ॥ गर्भास्सप्त ॥

॥ बो वृ ॥

पूर्वसूत्रेशक्तिगर्भाशक्तिमुक्त्वायथाक्रमम् । तद्गर्भानांप्रभेदोस्मिन्संग्रहेणप्रचक्षते ॥ १ ॥

पद्द्वयंहिसूत्रेस्मिन्पदच्छेदनतस्स्मृतम् । तत्रादिमपदाद्गर्भास्सामान्येनप्रदर्शिताः ॥ २ ॥

द्वितीयपदतस्तासांसंख्यासम्यक्प्रदर्शिता । एवमुक्त्वापदार्थोस्यसामान्यार्थोधुनोच्यते ॥ ३ ॥

॥ सामान्यार्थः ॥

कालविद्युद्भूतऋतुशीतोष्णकिरणाइति । गर्भास्सप्तइतिप्रोक्ताअदितेस्सृष्टिहेतुकाः ॥ ४ ॥

॥ सप्तगर्भलक्षणमुक्तंगर्भतत्वप्रकाशिकायाम् ॥

भूतविद्युत्कालऋतुशीतोष्णकिरणाःक्रमात् । एतेसप्तादितेर्गर्भाइतिप्रोक्तामहर्षिभिः ॥ ६ ॥

Garbha came into existence This shakti is described as Aditi in the shastras by the learned. This is the purport of this aphorism.

APHORISM 44.

Garbhas (are) seven.

THE COMMENTARY.

In the previous aphorism, Shakti Garbha shakti was dealt with. The varieties of Garbhas will be briefly described in this aphorism.

There are two words in this aphorism. The several garbhas are mentioned by the first word. The number of those Garbhas is given by the second word. This is what the words of the aphorism signify while its general sense is as follows.

THE GENERAL SENSE OF THE APHORISM.

Shastras declare that the said Aditi shakti contains seven garbhas which are the source of creation of the entire universe.

Those Garbhas are:—

1. Kala Garbha, 2. Vidyut Garbha, 3. Bhuta Garbha, 4. Ritu Garbha, 5. Sheeta Garbha, 6. Ushna Garbha, 7. Kirana Garbha.

॥ सूत्रम् ४५ ॥

# ॥ भूतकिरणाः पंचतत्संयोगात् ॥

॥ बो वृ ॥

उक्त्वादितेस्सप्तगर्भान्पूर्वसूत्रेयथाक्रमम् । अथेदानींपंचभूतोत्पत्तिंरस्मिन्प्रचक्षते ॥१॥
पदानित्रीणिसूत्रेस्मिन्निर्णितानियथाविधि । तत्रादिमपदाद्भूतकिरणास्संप्रदर्शिताः ॥२॥
द्वितीयपदतस्तद्वत्तत्संख्यासन्निरूपिता । कश्यपगर्भसंयोगस्तृतीयपदतस्स्मृतः ॥३॥
पदानामेवमुक्त्वार्थस्सूत्रस्यास्ययथामति । अथेदानींसंग्रहेणसामान्यार्थोनिरूप्यते ॥४॥

॥ सामान्यार्थः ॥

कश्यपस्यादितेर्भूतगर्भेशक्तेश्चकेवलम् । परस्परसमायोगादाकाशादिक्रमेणहि ॥५॥
तद्गर्भतःपंचभूतकिरणास्संबभूवतुः । एवंसामान्यार्थमुक्त्वाविशेषार्थोस्यकीर्त्यते ॥६॥

APHORISM 45

By the combination of the Shaktis of Kasyapa and the Bhutagarbha of Aditi, the five rays of Bhutas or elements came into existence.

THE COMMENTARY

The origin of the seven garbhas of Aditi was traced in the previous aphorism. Now the origin of the five Bhutas or elements will be described in this aphorism.

There are three words in this aphorism. The first word mentions the rays of Bhutas or elements. The second word gives their number namely five. The third word points out their origin viz., the combination of Kasyapa and the Bhutagarbha of Aditi. This is the meaning of the words of the aphorism while its general sense is as follows:—

THE GENERAL SENSE OF THE APHORISM.

By the mutual contact of Kasyapa and the Bhutagarbha of Aditi, the five rays of Bhutas or elements in the order of Akasa came into existence from out of the latter viz., the Bhutagarbha of Aditi. This is the general sense of the aphorism and the explanatory meaning follows.

॥ विशेषार्थः ॥

॥ तदुक्तंसृष्टिविलासे ॥

सोकामयतबहुस्यांप्रजायेयेतिवाक्यतः । आत्मनस्सृष्टिसंकल्पशक्तिप्राहसनातनी ॥७॥
सैवमूलप्रकृतिरित्यात्मनोपाधिरित्यपि । संकीर्तिताविशेषेणशास्त्रेषुज्ञानवित्तमैः ॥८॥
सईक्षितेतिवाक्येनेक्षणाशक्तिपरात्मनः । तथैवकृपयाप्राहश्रुतिर्लोकहितैषिणी ॥ ॥९॥
यदीक्षणाशक्तिरितिश्रृतिवाक्यादुदीरिनम् । तदात्मप्रकाशइतिप्रवदन्तिमनीषिणः ॥१०॥
यत्सृष्टिसंकल्पशक्तिरित्युक्तंश्रुतिवाक्यतः । तच्छायातमइत्याहुश्चित्प्रकाशस्यकेवलम् ॥११॥
पश्चात्तदीक्षणाशक्त्याप्रकृतिःक्षोभितासति । समष्टिव्यष्टिभेदेनसृष्ट्यर्थमभवद्द्विधा ॥१२॥
तयोस्समष्टिशक्तिर्यागुणसाम्यात्परात्मनः । प्रतिबिंबसमासाद्यतस्मिन्नेवचिदात्मनि ॥१३॥
असंपर्कात्स्वयंपश्चात्पद्मपत्रमिवांभसि । अविनाभावतोनित्यमवर्ततस्वभावतः ॥१४॥

THE EXPLANATORY MEANING.

The creation of bhootas or elements as expounded in Srushti Vilasa is here explained, thus.

The Eternal Sruti by its sentence, 'The Parabrahman ideated that He should expand and appear as various phenomena of the Universe' speaks of the Shakti of His volition for creation. It is this Shakti of volition of Paramatman that is called Mulaprakriti and Upadhi to Atman by the learned in Shastras. Again the benevolent Shruti by its passage, 'He saw, etc.,' points out Brahman's Shakti of seeing or thinking. That which is spoken of by the Sruti as Ikshana Shakti or the power of seeing or contemplating, is said to be the brilliance or glory of Atman, by the learned. On the other hand that which is styled as the Power of volition for creation by the Shruti is termed darkness by the wise. Thereupon the Prakriti Shakti getting agitated by the power of seeing or contemplating, assumed the two forms namely Samashti or macrocosmic power and Vyashti or microcosmic power, for the propagation of the Universe. Of these two the aggregate or macrocosmic power naturally remained in Paramatman eternally, inseparably and unattached just as the lotus-leaf in water. Similarly, that which is called

याव्यष्टिशक्तिरित्युक्ताप्रकृतेश्शास्त्रतस्तथा । सैवतत्प्रतिबिंबेनसंयुक्ताध्वांतरूपिणी ॥१५॥
गुणवैशम्यतःपश्चात्त्रिधाभूत्वायथाक्रमम् । समष्टिशक्तिवत्तस्मिन्नविनाभावतस्स्वयम् ॥१६॥
अवर्ततस्वभावेनसर्वदापरमात्मनि । ततस्त्वसृष्टिसंकल्पशक्तिमाहृत्यवेगतः • ॥१७॥
संदधेस्वेक्षणाशक्त्यांजगत्सृष्ट्यर्थमीश्वरः । पश्चात्तत्सृष्टिसंकल्पशक्तिस्स्वगुणभेदतः ॥१८॥
स्वान्तर्गतेक्षणाशक्तिंसमावृणोत्त्रिधाक्रमात् । एतदावरणमेवमुनयोब्रह्मवादिनः ॥१९॥
त्रयीमण्डलमित्याहुरादित्यइतिचक्रमात् । पश्चात्तदीक्षणाशक्तिःचित्प्रकाशस्वरूपिणी ॥२०॥
हिरण्यगर्भत्वमभजदादित्योपाधितस्स्वतः । हिरण्यगर्भइतियःपूर्वमेवप्रकीर्तितः ॥२१॥
सएवात्रविशेषेणविशदीकृत्यवर्णितः । एषएवविशेषेणजगत्सृष्टिंविचिन्तयन् ॥२२॥
स्वप्रकाशांशेनपश्चात्कश्यपज्योतिर्मंडलम् । जगत्सृष्ट्यर्थमसृजत्स्वयमेवविभुःक्रमात् ॥२३॥
तथैवस्वोपाधिभूतादित्यशक्तिमहौजसम् । समाकृष्यादितिशक्तिस्वरूपेणविनिर्ममे ॥२४॥
पश्चात्तददितिशक्तिःकश्यपाकर्षणात्स्वयम् । तमेवावृत्यवेगेनसप्तगर्भान्प्रपेदिरे ॥२५॥

Vyashti Shakti in Shastras and which is dark in nature, combining with the image of Paramatman got split up into three divisions on account of the unequal parts of Satwa, Raja and Tama Gunas and remained naturally and inseparably in Paramatman just like the Samashti Shakti. For the sake of the propagation of the Universe thereupon Parameswara attracted His power of volition for creation quickly and mixed it with the power of seeing or contemplating. Then the Srushti Sankalpa Shakti assuming three parts on account of its three gunas, gradually enveloped the Ikshana Shakti existing within it. It is this envelope or orb that seekers after Brahman call as Thrayee Mandala or the orb of Thrayee and Aditya Mandala, or the orb of Aditya. Thereupon the Ikshana Shakti of Parameswara which is in the form of Chit assumed the form of Hiranya Garbha on account of the Upadhi of Aditya Mandala. Mention has been made of Hiranya Garbha at the beginning of this shastra and it is to be noted here that the same Hiranya Garbha is delineated here in rather a vivid manner. Then this Hiranya Garbha, the Lord of Creation created the globe of Kasyapa from out of a fraction of His own brilliance, for the sake of propagation of the Universe. Again He created Aditi from the Shakti

तत्सप्तगर्भकश्यपशक्त्योस्संयोगतस्स्वतः । पंचभूतादिक्रमेणजगत्सृष्टिर्भविष्यति ॥२६॥
इत्यादि ॥

॥ पंचभूतोत्पत्तिरुक्तंतत्रैव ॥

कश्यपस्यमयूखानांभूतगर्भस्यचादितेः । अन्योन्यसंघर्षणेनसूक्ष्मशब्दसमन्वितः ॥२७॥
आकाशकिरणोजातश्शक्तिभिर्दशभिर्युतः । तयोःकश्यपशक्त्यंशआकाशइतिकीर्तितः ॥२८॥
सोवकाशइतिप्रोक्तस्सृष्ट्यधिष्ठानमित्यपि । तथैवादितिशक्त्यंश्शब्दइत्यभिधीयते ॥९९॥
सएवेक्षणसंकल्पशक्तिभ्यामात्मनःपुनः । संचोदितोनेककोटिब्रह्माण्डाकारमाययौ ॥२०॥
इदमेवविशेषेणश्रुतिस्मृत्यादिषुक्रमात् । ब्रह्मणोविवृतरूपमितिप्राहुर्मनीषिणः ॥३१॥
तच्छब्दाकाशसंयोगाच्छब्दस्पर्शात्मकोनिलः । संजातोभूत्त्रयोदशशक्तिभिर्मिळितःक्रमात् ॥
तच्छब्दस्पर्शसंयोगादष्टशक्तिसमन्वितः । क्रमाच्छब्दस्दर्शरूपात्मकोग्निस्समजायत ॥३३॥

of Aditya who is extraordinarily splendrous and who is Upadhi to Him. The Aditi Shakti then being attracted by Kasyapa enveloped him and bore the seven creative garbhas. By the combination of the seven garbhas of Aditi and of Kasyapa, the creation of Universe in the order of Pancha Bhutas or the five elements naturally takes place.

The origin of the five elements is described in the said Srushti vilasa as follows.—

It has already been observed [that creation takes place commencing with the five elements. These elements are, Akasa, Vayu i. e., air, Agni i.e. fire, Jala i. e., water and Pruthivi i. e., earth. Shastras proclaim that these five elements are the five beams of the solar globe of Kasyapa. The origin of these five beams is this.

By the friction of the powers of the rays of Kasyapa solar globe and of Bhutagarbha of Aditi, the Bhuta Kirana of Akasa, which is very subtle in nature, which is coupled with sound and which consists of the ten characteristic powers, came into existence. Of these two powers i. e. power of the rays of the solar globe of Kasyapa and that of Aditigarbha, the power of Kasyapa is known as Akasa. This Akasa is described as the vacant space or the power that is the support of all creative work. On the other hand, the part of Aditi shakti

अग्नेश्शब्दस्पर्शरूपशक्तिसंघर्षणात्ततः । दृश्यादृश्यस्ततोमेध्यश्शक्तिभिर्दशाभिर्युतः ॥२४॥
आपोभवद्रूपरसशब्दस्पर्शात्मकःक्रमात् । शब्दस्पर्शरूपरसशक्तिसंघर्षणादपाम् ॥२५॥
शब्दस्पर्शरूपरसगन्धशक्त्यात्मकाततः । संजातापृथिवीपंचदशशक्तिभिरन्विता ॥२६॥
क्रमादेतान्पंचभूतकिरणानेवशास्त्रतः । पंचभूतानीतिसम्यक्प्रवदन्तिमनोषिणः ॥२७॥
एतानिपंचभूतानिजगद्वृक्षस्यकेवलम् । शुद्धबीजस्वरूपाणिप्रभवन्तिस्वभावतः ॥२८॥

॥ भूतशक्तिप्रभेदश्शक्तिसर्वस्वेनिरूपितः ॥

शब्दोवकाशसूक्ष्मश्चव्यापकोदृश्यमेवच । अधिष्ठानंस्थिरोस्पर्शअग्राह्योमानइत्यपि ॥२९॥

is said to be the sound of Akasa. This sound being induced and aided by the Ikshana shakti and Srushti sankalpa shakti of Atman assumed the shape of the Universe. It is described by the learned in shastras as the Vivruta or Expanded Form of Brahman. By the combination of this Sound and Akasa, Vayu or air having two characteristic gunas of Sound and Touch and thirteen characteristic powers or qualities, came into existence. Then by the combination of the powers of sound and Touch of air, Agni or fire with three gunas, namely, sound, touch and form and with the eight characteristic powers, emanated. By the combination of the powers of the sound, touch and form thereupon, water which has the four gunas viz. sound touch, form and liquidity which is both visible and invisible in form, which is very pure by nature and which possesses the five inherent powers or qualities, evolved. Afterwards by the combination of the four gunas of water, earth with its five gunas viz: sound, touch, form, liquidity and smell and with the fifteen characteristic powers came into existence.

Thus the learned declare in shastras that the five Bhutakiranas or rays of Kasyapa are the five Bhutas or elements. In short it is to be noted that these five elements constitute the pure and primary seeds of the Tree of Universe. This is what Srushti vilasa says on the point.

Shakti Sarvaswa enumerates the characteristic powers of each of the five elements mentioned above and they are tabulated hereunder.

आकाशशक्तयइतिदशैतेसंप्रकीर्तिताः । शब्दोवेगःकंपनश्चघर्षणोछेदनस्तथा ॥४०॥
प्रसारणोप्राणनश्चप्रवाहश्शीतळस्तथा । द्रवोघनोष्णस्पर्शश्चेत्येतेस्युर्वायुशक्तयः ॥४१॥
उष्णश्शब्दस्पन्दनश्चरूपंकान्तिश्शिखातथा । दाहकःपाचकश्चाग्नेश्शक्तयोष्टइतीरितः॥४२॥

*I. The Shaktis of Akasa.*

1. The Shakti of Sound,
2. ,, Accommodation,
3. ,, Subtlety,
4. ,, Pervasion,
5. ,, Invisibility,
6. ,, Adhishtana or support,
7. ,, Firmness or eternity,
8. ,, Untouchability (beyond the sense of touch),
9. ,, Incomprehensibility,
10. ,, Immeasurability.

These are the ten characteristic powers of Akasa.

*II. The characteristic Shaktis of Vayu or air are 13 and they are :—*

1. The power of Sound,
2. ,, ,, Rapidity, impetuosity or force,
3. ,, ,, Shaking,
4. ,, ,, Friction,
5. ,, ,, Cutting,
6. ,, ,, Pervasion,
7. ,, ,, Vitality or life-giving energy,
8. ,, ,, Flowing in floods,
9. ,, ,, Coldness,
10. ,, ,, Fluidity,
11. ,, ,, Solidity,
12. ,, ,, Heat,
13. ,, ,, Touch.

These are the inherent powers of Air.

शब्दोरूपंरसस्स्पर्शशीतोवेगःप्रवाहकः । घर्षणोजृंभणोक्लेदनश्चेतिजलशक्तयः ॥४३॥
शब्दस्पर्शोरूपरसगन्धकाठिन्यमार्दवम् । आकर्षणोत्क्षेपणश्चविकासोवमनोचलः ॥४४॥
पोषकोनाशकोगालनंश्चेत्यवनिशक्तयः ॥

॥ इत्यादि ॥

॥ एवमुक्तप्रकारेणविशेषार्थोस्यकीर्तितः ॥

*III. The characteristic powers of Fire are 8 and they are :-*

1. The power of Heat,
2. ,, ,, Sound,
3. ,, ,, Motion,
4. ,, ,, Form or shape,
5. ,, ,, Luminosity,
6. ,, ,, Flames,
7. ,, ,, Burning,
8. ,, ,, Cooking or ripening,

These are the natural powers of Fire.

*IV. The characteristic powers of Water are :—*

1. The power of Sound,
2. ,, ,, Form,
3. ,, ,, Liquidity,
4 ,, ,, Touch,
5. ,, ,, Coldness,
6. ,, ,, Rapidity,
7. ,, ,, Floods,
8. ,, ,, Friction,
9. ,, ,, Swelling or expansion,
10. ,, ,, Jumping.

These are the 10 characteristic powers of Water.

*V. The inherent powers of Earth are 15 and they are:—*

1. The power of Sound,
2. ,, ,, Liquidity,
3. ,, ,, Touch,
4. ,, ,, Form,
5. ,, ,, Odour,

॥ सूत्रम् ३६ ॥

## ॥ एवमारोगादयस्सप्तकिरणाः कश्यप-किरणगर्भयोस्संघर्षणात् ॥

॥ बो वृ ॥

पंचभूतोत्पत्तिमुक्त्वापूर्वसूत्रेयथाक्रमम् । अस्मिन्नारोगादिसप्तकिरणोत्पत्तिरुच्यते ॥१॥
पदानिपंचसूत्रेस्मिन्निर्णितानियथाक्रमम् । तत्रादिमपदात्पूर्वदृष्टान्तस्संप्रदर्शितः ॥२॥
आरोगादीनिनामानिद्वितीयपदस्स्मृतः । तृतीयपदतस्तद्वत्किरणास्सप्तईरिताः ॥३॥
कश्यपकिरणगर्भौचतुर्थपदतस्स्मृतौ । तथैवपंचमपदात्तत्संघर्षणईरितः ॥४॥
पदार्थमेवमुक्त्वास्यसंप्रदायानुसारतः । सामान्यार्थोद्यविधिवत्संग्रहेणनिरूप्यते ॥५॥

6. ,, ,, Hardness,
7. ,, ,, Wetting or drenching,
8. ,, ,, Attraction,
9. ,, ,, Tossing,
10. ,, ,, Expansion,
11. ,, ,, Vomiting or expelling,
12. ,, ,, Firmness or stability,
13. ,, ,, Nourishing,
14. ,, ,, Destroying,
15. ,, ,, Melting.

These are the characteristic powers of the 5th element viz. the Earth.

Thus ends the explanatory and technical meaning of this aphorism.

### Aphorism 46

Similarly by the combination of Kasyapa and Kiranagarbha, the seven rays such as Aroga emanated. This is the aphorism.

### The Commentary.

The process of emanation of the five elements was given in the previous aphorism and the origin of the seven solar rays such as Aroga will be traced in this aphorism.

॥ सामान्यार्थः ॥

आरोगाद्यास्सप्तकिरणाःकश्यपस्यमहात्मनः । पूर्वोक्तपंचभूतकिरणोत्पत्तिवत्क्रमात् ॥६॥
कश्यपादितिकिरणगर्भशक्त्योःपरस्परम् । संघर्षणात्समुत्पन्नामण्डलाकारतस्स्वतः ॥७॥
एतेषांनामधेयानियजुरारण्यकेक्रमात् । प्रोक्तानिसप्ततान्येवसंगृह्यात्रविलिख्यते ॥८॥
आरोगोभ्राजःपटरःपतंगस्स्वर्णरस्तथा । ज्योतिषीमान्विभासकश्चेतिसप्तयथाक्रमम् ॥९॥
किरणाःकश्यपस्यैतेसप्तसूर्याइतीरिताः । एतैरेवजगत्सृष्टिरितिशास्त्रविनिर्णयः ॥१०॥

